Digitized by Arya Samaj Foundation Chennai and eGangotri

123

...ट्य - कादम्बकम्

डॉ० रामाशीष पाण्डेयः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुस्तकनाम — काव्य-कादम्बकम्

लेखकः — डा० रामाशीष पाण्डेयः

कार्यालयीयसंकेतः — आचार्योऽध्यक्षश्च - संस्कृत-विभागस्य, मारवाड़ीमहाविद्यालयः, राँची।

आवासीयसंकेतः - एम० ४६ (ओ० एस०) इरम् डाउरिंग कालोनी, राँची (बिहार)

प्रकाशनवर्षम् — १९९३ ई०।

महर्षि-पाणिनि-प्रज्ञा-अनुसन्धान
तिथी.....
पु०सं०.....
भारती पुस्तकालय

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

काव्य-कादम्बकम्

प्रणेता

डॉ० रामाशीष पाण्डेयः

एम० ए० (संस्कृत, हिन्दी) पी-एच० डी०, डी० लिट्०

साहित्यव्याकरणवेदाचार्यः

बिहारशासनेन वैदिक-साहित्य-पुरस्कारेण सम्मानितः

आचार्योऽध्यक्षश्च-संस्कृतविभागस्य

मारवाड़ी महाविद्यालयः, रांची

राँची विश्वविद्यालयः, राँची।

प्रबोध-संस्कृत-प्रकाशनम्

हरमू, राँची (बिहार)

CC-0.Panini Kanya Maha Vidyalaya Collection.

संस्करणम्—प्रथमम् १९९३ ई० वर्षम्
Digitized by Arya Samaj Foundation Chennai and eGangotri
© सर्वेऽधिकारा लेखकाधीनाः

प्रकाशकः

प्रबोध-संस्कृत-प्रकाशनम्

हरमू हाउसिंग कॉलोनी,

राँची (बिहार)

मूल्यम्—अशीति रुप्यकाणि (Rs. 80-00)

मुद्रक—भारत प्रिंटिंग प्रेस, पुरूलिया रोड, राँची।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

1069/6

प्राक्कथनम्

हृदये स्थिता भावाः सामाजिकवृत्तविशेषैः प्रभाविता यथावसरं प्रस्फुटिता दृश्यन्ते। समाजे राज्ये राष्ट्रे जगति च प्रभावपूर्णा वृत्तविशेषाः प्रायः समये-समये प्रकटिता भवन्ति। तैर्वृत्तविशेषैः सामान्येन विशेषेण च जनाः प्रभाविता दृश्यन्ते। वृत्तवर्तिते सति प्रभाविता भावविशेषा येन केन माध्यमेन हृदयान्निर्गन्तुमिच्छन्तीति सामान्यलोकाअपि स्वस्वभावं यथाविहितेन शब्दसंकेतानुकरणादिमाध्यमेन प्रकटयन्ति। परं कवेर्भावानुबन्धनं शब्दार्थमाध्यमेन काव्यात्मकवैशिष्ट्येन गद्यमाध्यमेन पद्यमाध्यमेनोभयात्मकगद्यपद्यात्मकरूपेण च जायते। तत्रापि कवेर्जन्मजन्मार्जितया-शक्त्या प्रतिभाबलेन लोकशास्त्रकाव्याद्यवेक्षणात् नैपुण्येन काव्यज्ञशिक्षया-भ्यासेन च कामपि विशिष्टामवस्थामधिगत्य काव्यमार्गेण प्रादुर्भूता भवन्ति ते भावविशेषाः। कवेर्मनसि समान्दोलिता वहिरागन्तुं त्वरमाणाः शब्दार्थ-भूता विशिष्टार्थसम्पन्ना रसाप्लाविता गुणालङ्कारसमन्विता भावाः काव्ये निबद्धा भवन्ति। लोकोत्तरचमत्कारसम्पन्नाः सर्वस्मिन् काले नूतनता-मादधानाः सरसहृदयानां पाठकानां रसास्वादकानाञ्च मनांसि रञ्जयन्ति परमानन्देनानन्दयन्तीति कवेः काव्यानां भावानाञ्च वैशिष्ट्यम्।

काव्यकादम्बकेऽस्मिन् काव्यसमवाये अध्ययनकालादारभ्य वर्तमानसमयं यावद्रचिताः संस्कृतस्य स्फुटकविताः काव्यविशेषाः प्रायः भारतस्य विभिन्नप्रदेशेषु प्रकाशितासु विविधसंस्कृतपत्रिकासु प्रकाशिता आकाशवाणीकेन्द्रात् प्रसारिताश्च विद्यन्ते। अनेकाश्च कविता अद्य यावद-प्रकाशिता आकाशवाणीकेन्द्रादप्रसारिता अप्यत्र प्रकाश्यन्ते। अत्र प्रकाशि-तासु कविताष्वनेका राज्यस्तरीयेष्वखिलभारतीयेषु च संस्कृतकविसम्मेलनेषु-श्राविताः सन्ति। कवितासु भावानुकूलाः समयानुकूला विविधविधाया वृत्तविशेषा विराजन्ते। स्वतन्त्रवृत्तैराश्रिताः स्फुटकविताः सामान्यजनानां कृतेऽपि बोधगम्या रसाभिव्यक्तौ समर्थाः सहजाश्च विद्यन्ते कादम्बकेऽ-स्मिन् कदम्बायिताः। भाषायाः सारल्येन हिन्दीज्ञा अपि रसावाप्तये समर्था भविष्यन्तीति मे विश्वासः। स्तोत्रादिरूपा भक्त्याश्रिता राज्यस्य देशस्य च गौरवप्रतिपादने निरता यथार्थविम्बस्योपस्थापका नानारसाप्लाविता

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विविधवस्तुव्यञ्जनक्षमा नानावृत्तैर्मात्राभिश्चाभिग्रथिता राष्ट्रभावावलिता राष्ट्रैक्यसम्पादने समर्था रागात्मकतां गेयात्मकतां लयात्मकताञ्चादधानाः काव्यविशेषाः कादम्बकेऽस्मिन् प्रकाशिता विशेषतः सामान्यजनेभ्यः सामान्येन चान्येभ्यः संस्कृतरसिकेभ्यः सामाजिकदर्पणभूतास्तेषामग्रे समुपस्थाप्यन्ते।

संस्कृतभाषायां काव्यबन्धनं सरलं कठिनञ्च वरीवर्ति। संस्कृत भाषाया व्यवहारस्याल्पीयस्त्वात् सम्यक्परिवेशाभावाच्च तस्यां काव्य-स्फुरणे भवति काठिन्यं परं प्रकृतिरमणीये सरस्वत्याः प्राङ्गणे सर्वाञ्चिते तस्या भाण्डागारे समाहिता भावा निसर्गतः प्रादुर्भूता भवन्तीति सारल्य-मपि। सम्प्रत्याधुनिककाले नानासंक्रमणान्विते वृत्तबाहुल्ये मनसि भावानां प्रस्फुरणं बाहुल्येन जायते। काव्यबन्धनेऽपि ते भावाः सहजवृत्या समाग-च्छन्ति परं प्रकाशनाभावात् काव्यभूता कवीनां गृहे पाण्डुलिप्यां विराजन्ते।

संस्कृतंप्रति समासक्तैः समर्पितैश्च कविभिः स्वान्तः सुखाय सामाजिकप्रतिबिम्बभूतायां कवितायां स्वच्छायामवलोकनाय सामान्यानां विशिष्टानाञ्च संस्कृतरसिकानां कृते निर्मिता अभिव्यक्ताः प्रकाशिताश्च कविताः पुस्तके समादृता भवन्ति। सर्वकारस्यार्थिकानुदानं विना पुस्तकानां विशेषतः संस्कृतग्रन्थानां प्रकाशनं महार्घतासम्पन्नेऽस्मिन् काले कठिनं कार्यम्। आर्थिकानुदानाभावेऽपि समाजकल्याणाय राष्ट्रकल्याणाय जन-कल्याणाय च येन केन प्रकारेण पुस्तक—प्रकाशने साफल्यमधिगच्छन्ति कवयः।

मुद्रणालयस्यास्य व्यवस्थापकेन कर्मव्यापृतपुरुषैश्च रूचिं दत्वा मनोयोगेन मुद्रणकार्यं सम्पादितमतस्ते सर्वे धन्यवादार्हाः। राँच्यां संस्कृत पुस्तकस्य प्रकाशनं कठिनकार्यमतो मत्कृता मुद्रणसम्बद्धा वा त्रुटयः क्षन्तव्याः। अनेन काव्यकादम्बकेन यदि संस्कृतज्ञा आनन्दिता भविष्यन्ति तदास्मिन् क्षेत्रेऽस्य साफल्यम्। पुस्तकस्यास्य विषये समग्ररूपेण कथनं संगतमस्ति—

कार्यजातं समग्रं हि लोकाश्रितं
गुम्फितं सत्फलाकांक्षितं वाञ्छितम्।
बाल्यकालादिमाश्चात्र या भावना
स्ताभिरित्थं नवं काव्यकादम्बकम्।

रथोत्सवः
(२१-६-१९९३)

भवतां वशंवदः
रामाशीष पाण्डेयः

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कदम्बक्रमः

क्रमः	शीर्षकः	पृष्ठम्
१	सरस्वत्याः स्तवनम्	१
२	त्रिदेवस्तवनम्	१
३	सोऽयं नो विदधातु०	२
४	शान्तिर्भुवि संधेया	३
५	देवानां स्वागतगीतिः, स्वागतं श्रीगणेशाय०	५
६	स्वागतं मे त्रिदेवाय०	६
७	रामभद्राय तस्मै०	७
८	वाणभट्टाय तस्मै०	९
९	तं नीलकण्ठं सततं०	१०
१०	आदि कविं वाल्मीकिं वन्दे	११
११	जगद्गुरुं श्रीकृष्णं वन्दे	१८
१२	वीरवरं हनुमन्तं वन्दे	२३
१३	आदिशङ्कराचार्यं वन्दे	३२
१४	भारती वल्लकी वादने तिष्ठति-	३५
१५	भारती भारते भासतां सर्वदा	३६
१६	भारते भातु भव्या शुभाभारती	४१
१७	विश्वकवि किल कालीदासः	४२
१८	ब्रूते गद्यकविः श्रीवाणः	४९
१९	जयतु विहारप्रदेशः	५५
२०	भ्रातुर्हस्ते न्यस्तम्	६०
२१	वसन्त कामिनी शुभा०	६१
२२	सत्यमेव जयते	६३
२३	दीपावली	६४
२४	वर्षं नवं मङ्गलमातनोतु	६५
२५	अस्यां क्षितौ भारते	६६
२६	कुत्रास्ति भद्रोजनः	६८
२७	कुत्रास्ति भद्रोजनः	७०
२८	पुत्राश्च मे क्व स्थिताः	७१
२९	स्वार्थं हेतोः सदा चिन्तनं०	७२
३०	वेंकटेशाष्टकम्	७३

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रमः	शीर्षकम्	पृष्ठम्
३१	ज्ञानानन्दाष्टकम्-	७५
३२	गुर्वष्टकम्	७६
३३	मनोरथाष्टकम्	७९
३४	मङ्गलाष्टकम्	८१
३५	पहाड़ीबाबा स्तोत्रम्	८२
३६	शुभं स्वागतम्	८५
३७	विद्यापतेर्गीतम्	८७
३८	तं भारतं नौमि०	८७
३९	आत्मतत्त्वं सदान्तः	९०
४०	अभिनन्दन पत्रम्	९१
४१	गंगाजयतु०	९२
४२	शकुन्तला रचयति०	९३
४३	स्वागतगीतिः	९५
४४	उद्बोधनगीतिः	९६
४५	उज्जयिन्यां कालिदासः	९७
४६	शिप्रा	९८
४७	भारतस्य प्रत्यभिज्ञानम्	९८
४८	ग्रहाणां सम्बद्धता	९८
४९	शृणु कौतुक सद्मनि०	९९
५०	श्लिष्टप्रहासिका	१०१
५१	मित्राद्भयम्-०	१०१
५२	खेलति खलु होलीं	१०३
५३	होलिका	१०४
५४	नेता	१०५
५५	सर्वे स्वतन्त्राः	१०६
५६	नमामि चाटुकारिते	१०६
५७	विवादे प्रहसितवदनः	१०८
५८	तस्मै नमः कलियुगस्य०	१०९
५९	भारतीया स्थितिः	११०
६०	प्रहेलिकाः	१११

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीः

सरस्वत्यै नमः

सरस्वत्याः स्तवनम्

सुभव्यां वाग्देवीं धवलवसनां सुस्मितमुखीं
प्रसन्नां पद्माक्षीं सततसुखदां तामभयदाम् ।
सदा हंसारूढां सदयहृदयां पुस्तकयुतां
सभक्त्या ध्यायामो वसतु हृदि नो ज्ञानसलिले ॥१॥

या वीणास्वननैः करोति नितरां ज्ञानान्वितं भूतलं
या शुभ्रैर्वसनैस्तनोति शुभदां शोभां सुभव्यां सदा ।
या स्वच्छस्फटिकैस्तथा च कमलैः संशोभिता भूषिता
सा मेधां सुखदां ददातु मुदिता नो भारती शारदा ॥३॥

या भारती ज्ञानमनन्तकल्पं, नित्यं नरेभ्योऽथ ददाति नव्यम्
प्रभां मनोज्ञां सुखदाञ्च भव्यां सा सर्वदा यच्छतु भारतेऽस्मिन् ॥ ॥

त्रिदेव—स्तवनम्

यः सृष्टिकर्मनिरतोऽत्र करोति सृष्टिं
स्वज्ञानपुञ्जप्रभया च ददाति दृष्टिम् ।
वेदान् प्रदाय पुरुषं कृतवान् प्रपूर्णं
तस्मै नमः प्रथमपूज्यपितामहाय ॥

यश्शेते खलु शेषनागशयने जागर्ति नित्यं भुवि
लोकान् पालयतीति कर्मनिरतो व्याप्तो जगन्मण्डले ।
दुष्टान् दण्डयितुं दधार नितरां नानावतारं शुभं
तस्मै लोकजयाय धर्मधरते श्रीविष्णवे मे नमः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

यस्य वाहनं वृषश्शोभते कृषेःसमग्रं मूलं
Digitized by Arya Samaj Foundation Chennai and eGangotri
स्वयं त्रिलोकी लोकरक्षको भ्रमति भूतले नित्यम्
संहारे निरतोऽयं देवो धृत्वा निजं पिनाकं
सुधां प्रयच्छति सदा परस्मै पीत्वा विषं प्रकामम् ।
सूत्राणामथ चतुर्दशत्वं ढक्कानादैर्दत्तम्
व्याकरणस्य समग्रं सूत्रं येन निर्मितं भव्यम्
संस्कृतभूमावेकरूपता येन जायते पूर्णा
तस्मै ज्ञानमयाय नमः स्यान्नमः शिवाय भवाय ॥

सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः

(शार्दूलविक्रीडितम्)

ब्रह्माविष्णुमहेशरूपरचितो यो जायते स्वात्मनः
यः सृष्टिस्थितिनाशकर्मसु रतो यो धर्मभूतो भुवि ।
यो लोके सततं प्रयच्छति निजामाभां सुभव्यां शुभां
सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥१॥

यं लोकाः समुपासते विभुरिति ज्योतीति सद्योगिनः
स्वात्माराम इति प्रभुत्वनिरताः सत्यं ह्यघोराश्रयाः ।
ओमित्यास्तिकधर्मपालनरता नास्तीति वै नास्तिकाः
सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥२॥

येनेदं भुवनं विभाति शुभदं सर्वार्थयुक्तं सदा
येनेदं भुवनं चकास्ति नितरां सूर्यस्वरूपेण तत् ।
येनावाप्य बलं भवन्ति निरताः कार्ये पुनः प्राणिनः
सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥३॥

यस्मै विश्वमिदं विनिर्मितमहो चित्रं महत्सम्पदं
भोगाः षड्रससंयुता बहुविधाः सन्निर्मिता भूतले ।
वेदा निश्वसिताः षडङ्गसहिताः सर्वार्थसिद्धिप्रदाः
सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥४॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

यस्माद्विष्टमिदं जगच्चसकलं लोका लभन्ते मुदं
Digitized by Arya Samaj Foundation Chennai and eGangotri
ज्ञानानि प्रथितानि कर्मनिरता वाग्देवतास्सेवकाः।
दैत्या विभ्यति दुष्टभाववलिता दुष्कर्मदक्षाः खलाः
सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥५॥

यस्यादेशमवाप्य कर्मनिरतः सञ्जायते जङ्गमो
यस्याज्ञां शिरसा वहन्ति सततं देवाश्च नाकस्थिताः।
भावं यस्य विदुः समाधिनिरताः स्वान्तस्थमत्यद्भुतं
सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥६॥

यस्मिन् विश्वरता भवन्ति सकला लीना लये प्राणिनो
भूतानि प्रथितानि विश्वविहितान्येवं महायोगिनः।
तत्त्वानि प्रहितानि यान्ति मिलितानीत्थं प्रकामं सदा
सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्य नाथो हरिः ॥७॥

या नानारूचिधारकश्च रमते यं स्तौति योगीश्वरो
येनेदं भुवनं चकास्ति नितरां यस्मै नमः सर्वदा।
यस्माद्विभ्यति दुष्टभाववलिता यस्याज्ञया भूतलं
यस्मिन् विश्वरता भवन्ति सकला लीना नये प्राणिनः॥
सोऽयं नो विदधातु वाञ्छित फलं त्रैलोक्यनाथो हरिः ॥८॥

विशेषः—प्रथमश्लोकतः सप्तमश्लोकंयावत् प्रथमाद्वितीया - प्रभृति सप्तविभक्तयः क्रमशः प्रयुक्ताः पुनश्चाष्टमे श्लोके सर्वा विभक्तयः प्रयुक्ता-सन्ति।

कवितेयम् 'अध्यात्मभारती' पत्रिकायां १९८३ ई० वर्षे प्रकाशिता।

शान्तिर्भुवि सन्धेया

द्यौः शान्तिः प्रथमं प्रकल्पिता, सकलसृष्टिरक्षायै
विविधग्रहेषु सदा क्षिप्यते, प्रक्षेपणमिह भूत्यै।
द्युलोके सूर्यादिग्रहाणां, शान्तिः सदा विधेया
अद्य प्रतीक्षा सकलजनानां, शान्तिर्भुवि संधेया ॥१॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

अन्तरिक्षयानैर्बहुरूपैर्भ्रमे सन्ति बहुदेशा
Digitized by Arya Samaj Foundation Chennai and eGangotri
अन्तरिक्षयुद्धस्याशंका, सदा वर्धिता ह्येषा ।
शान्तिरद्य नितरां खमण्डले, जीवेभ्यो द्रष्टव्या
अद्य प्रतीक्षा सकलजनानां, शान्तिर्भुवि सन्धेया ॥२॥

अणुयुद्धस्याशंका सम्प्रति जगति वर्धिता नव्या
सकलचराचरजननिवहानां, हानिर्नियता हेया ।
अतः पृथिव्यां शान्तिकामना, सर्वैःसदा विधेया
अद्य प्रतीक्षा सकलजनानां शान्तिर्भुवि सन्धेया ॥३॥

जलप्रदूषणं यदा जायते, तदा विनश्यति जीवः
स्वास्थ्यहीनता तत्र दृश्यते, शेषः सर्वः खर्वः ।
उदकमण्डले शान्तिः सर्वाः, तत्रजनैर्द्रष्टव्या
अद्य प्रतीक्षा सकलजनानां, शान्तिर्भुवि सन्धेया ॥४॥

रोगनाशने परं समर्था, ओषधयो भुवि सर्वाः
तत्र दूषणं यदा भविष्यति, तदा प्राणन किं वा ।
ओषधयः शान्तिः किल सर्वाः, सर्वैस्त्विह कथनीया
अद्य प्रतीक्षा सकलजनानां, शान्तिर्भुवि सन्धेया ॥५॥

प्राणवायुदाने निरतोऽसौ, वनस्पतिः किल भुवने
स्वास्थ्यवर्धकं फलं प्रयच्छति, जलं बलं प्रतिसदने ।
तस्य दूषणं नैव रोचते, वृद्धिः सदा विधेया
अद्य प्रतीक्षा सकलजनानां, शान्तिर्भुवि सन्धेया ॥६॥

विश्वस्मिन् भुवने ये जीवा, दिव्यप्रभाभिर्युक्ताः
सृष्टिर्येषां कृपया नियता, स्वस्मिन् कर्मणि सक्ताः
तेभ्यः सर्वेभ्यो देवेभ्यः, शान्तिरत्र पठनीया
अद्य प्रतीक्षा सकलजनानां, शान्तिर्भुवि सन्धेया ॥७॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जगन्नियन्ता ब्रह्मा राजते त्रिविधक्रियाभिर्युतं
सत्यं परमाराध्यं नित्यं, सृष्टिचालने सक्तम् ।
तस्मै शान्तिः सततं भूयाद्वाणीयं वक्तव्या
अद्य प्रतीक्षा सकलजनानां, शान्तिर्भुवि सन्धेया ॥८॥

विशेष :— 'कवितेयं २८ मात्रात्मिका, षोडशमात्रायां द्वादश मात्रायां च विरामः । संस्कृत सम्मेलनम् (पटना सिटी) पत्रिकायां २५ वर्षस्य तृतीयाङ्के प्रकाशिता ।

अत्र 'द्यौःशान्ति' रिति वैदिकशान्तिपाठस्य लौकिकसंस्कृते विस्तारकल्पना ।

देवानां स्वागतगीतिः

स्वागतं श्रीगणेशाय संस्वागतम्

(स्रग्विनी)

यो हि विघ्नं हरन् मंगलं वर्धयन्
ज्ञानदीपं सदा मानसे दीपयन् ।
बुद्धिदानं करोत्यादिदेवो भृशं
येन सर्वं विधं मंगलं संगतम् ॥१॥

स्वागतं श्रीगणेशाय संस्वागतम्

यो महेशस्य पुत्रोऽस्ति गौरीसुतः
कार्तिकेयाग्रजश्चैकदन्तः प्रियः ।
सर्व देवेषु पूज्यः सदा रक्षकः
येन रम्या मही सर्वदुःखं गतम् ॥२॥

स्वागतं श्रीगणेशाय संस्वागतम्

आननं यस्य सिन्दूरशोभायुतं
वारणेन्द्रस्य मत्तस्य सम्मोहकम् ।
मोदकैः पूरितं यस्य लम्बोदरं
येन लोका लभन्ते मुदं सन्ततम् ॥३॥

स्वागतं श्रीगणेशाय संस्वागतम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

मन्दगेनापि प्राप्तं गणेशं पदं
Digitized by Arya Samaj Foundation Chennai and eGangotri
यस्य नामास्ति विघ्नस्य विध्वंसकम् ।
यो हरत्याधिदुःखं स्वगीतोत्सवै-
र्येन नित्यं शुभं मङ्गलं विस्तृतम् ॥४॥

स्वागतं श्रीगणेशाय संस्वागतम्

सर्वदा दुष्कृतस्यान्तकश्शोभनो
नायकः सर्वदेवेषु सौख्यप्रदः ।
विश्ववन्द्यो विभुस्तुष्टिकर्ता शुभो
येन भव्यं शुभं मंगलं भूषितम् ॥५॥

स्वागतं श्रीगणेशाय संस्वागतम्

स्वागतं मे त्रिदेवाय संस्वागतम्

पञ्चतत्त्वैस्त्रिभिः साधनैः स्वैर्गुणै
र्जङ्गमस्याकृतिर्दीयते सर्वदा ।
कर्मकर्तृत्वशक्तिस्तथा चेतना
भाग्यरेखा पुनर्येन सन्निर्मिता ॥१॥

आदि देवोऽस्ति यो ज्ञानवृद्धः पुनः
यस्य पुत्री स्वयं भास्वरा भारती ।
ज्ञानविज्ञानदीक्षा चतुर्भिर्मुखै-
र्दीयते येन तस्मै शुभं स्वागतम् ॥२॥

आदिदेवाय तस्मै शुभं स्वागतम् ।
ब्रह्मणे स्वागतं वेधसे स्वागतम् ॥

कर्मबन्धेन सर्वान् जनान् बन्धयन्
सर्वजन्तून् पृथिव्यास्तथा पालयन् ।
कर्मयोगस्य विद्वेषकं दूषयन्
राजते भूतले यस्य चक्रं सृतम् ॥३॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यो रामायः प्रतिर्भूतले शोभते
धर्मसंस्थापनं यस्य कार्यं महत् ।
यो दधारावतारं दशं वैष्णवं
दैत्यनाशादिकं येन कार्यं कृतम् ।।४।।

विष्णवे स्वागतं चक्रिणे स्वागतम्
स्वागतं पद्महस्ताय संस्वागतम् ।।

पीडितं भूतलं वीक्ष्य भालस्थितं
नेत्रज्योतिर्दिगन्तेषु विस्तारयन् ।
भस्मयन् कामदेवं खलान् पीडयन्
स्वत्रिशूलेन पापात्मकान् शूलयन् ।।५।।

यो विभर्ति त्रिशूलं करे संततं
यः पिनाकेन हन्ति द्विपं राक्षसम् ।
वाहनं यस्य भव्यो वृषो राजते
यो ददाति प्रभूतं धनं मङ्गलम् ।।६।।

रूद्ररूपाय तस्मै सदा स्वागतम्
स्वागतं श्री महेशाय संस्वागतम् ।।
ब्रह्मणे स्वागतं विष्णवे स्वागतम्
स्वागतं मे त्रिदेवाय संस्वागतम् ।।७।।

रामभद्राय तस्मै शुभं स्वागतम्

शृंगिणा वेदविज्ञानदक्षेण यः
पुत्रयज्ञस्तु रामाय सम्पादितः ।
अग्निदेवः स्वयं मानवस्याकृतिं
धारयन् दत्तवान् तद्धविष्यं शुभम् ।।१।।
रामभद्राय तस्मै शुभं स्वागतम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामचन्द्रः स्वयं भूपतेः प्राङ्गणे
जन्म धृत्वा चकारात्मनः क्रीडनम्
शेषनागावतारस्तु श्रीलक्ष्मणो
येन रामाय सर्वं कृतं चार्पणम् ॥२॥

रामभद्राय तस्मै शुभं स्वागतम्

येन शस्त्रञ्च शास्त्रञ्च बाल्ये धृतं
विश्वकल्याणहेतोर्नरत्वं वृतम् ।
श्रेष्ठविद्याद्वयं योगजं शिक्षितं
यज्ञसंरक्षणं वीरभावैः कृतम् ॥३॥

रामभद्राय तस्मै शुभं स्वागतम्

ताडका राक्षसी घातिता राक्षसाः
यस्य बाणेन स्वर्गं गताः सान्वयाः ।
यज्ञपूर्णाहुतिस्तत्र दीक्षा गुरो—
र्येन सम्पादिता कर्मसम्पूजितम् ॥४॥

येन वाली हतः सेतुबन्धं कृतं
रावणो घातितो हेम लंका जिता ।
जानकी दैत्यदेशाद्विमुक्ता सदा
धर्म संस्थापनञ्चात्र सम्पादितम् ॥५॥

रामभद्राय तस्मै शुभं स्वागतम्

यस्य राज्ये प्रजाः संरताः कर्मणि
रोगमुक्ताश्चिरंजीविनः सान्वयाः ।
धर्मयुक्तास्तथा तापहीनाः सदा
राज्यसम्बर्द्धने संयुताः संततम् ॥६॥

रामभद्राय तस्मै शुभं स्वागतम्

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाणभट्टाय तस्मै शुभं स्वागतम्

येन शोणान्तिकेऽस्मिन् विहारे पुरा
प्रीतिकूटस्थले प्रीतिरूत्पादिता ।
जन्मना यस्य वत्सान्वयो भूषितो
येन संराजतेऽयं प्रदेशोऽधुना ॥१॥

यस्य नाम्ना प्रसिद्धं हि गद्यांगनं
यस्य नाम्ना प्रसिद्धं विहाराङ्गणम्
गद्यभट्टाय तस्मै शुभं स्वागतं
वाणभट्टाय तस्मै शुभं स्वागतम् ॥२॥

यस्य कादम्बरी कल्पना राजते
हर्षवृत्तान्विताऽऽख्यायिका भ्राजते ।
गद्ययुक्ता गिरा यस्य संशोभते
सत्यमुच्छिष्टमस्यैव तद्भूतले ॥३॥

ज्ञानरूपाय वाणाय संस्वागतं
वत्सपुत्राय तस्मै शुभं स्वागतम्
प्रीतिकूटस्थवाणाय संस्वागतं
वाणभट्टाय तस्मै शुभं स्वागतम् ॥४॥

यस्य गद्यं कवित्वस्य संसूचकं
सर्वथा काव्यभूमौ हि राजायते ।
सर्वभावान्वितं गद्यकाव्यद्वयं
यस्य गद्यस्य दीप्तिः सदा भ्राजते ॥५॥

यस्य वाण्या स्वयं प्लावितं संस्कृतं
ज्ञानदीपेन सर्वं प्रकाशान्वितम् ।
ज्ञानपुञ्जाय तस्मै शुभं स्वागतं
वाणभट्टाय तस्मै शुभं स्वागतम् ॥६॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तं नीलकण्ठं सततं नमामि

विश्वस्य कल्याणकृते सदा यः
पीत्वा विषं संभ्रमते पृथिव्याम् ।
दिव्यामृतं यच्छति वै परस्मै
तं नीलकण्ठं सततं नमामि ॥१॥

यो वन्यदेशस्य विभूषितस्य
शैलान्तिकस्याथ तटे नितान्तम् ।
वन्यं फलं भक्षति तत्र गच्छन्
तं नीलकण्ठं सततं नमामि ॥२॥

सर्वत्रगामो च दिगम्बरो यः
कल्याणकारी किल कान्तमूर्तिः ।
दृष्ट्वा नरा यं सुखिनो भवन्ति
तं नीलकण्ठं सततं नमामि ॥३॥

यस्यागमः स्याच्छुभकार्यहेतो-
र्यस्यास्ति पुण्यं शुभदर्शनञ्च ।
येनाखिलं भाति नरस्य वृत्तं
तं नीलकण्ठं सततं नमामि ॥४॥

पश्यन्ति यं देवगृहे वने वा
नद्यास्तटे पर्वतकन्दरे वा ।
दाता धनस्याथ बलस्य योऽस्ति
तं नीलकण्ठं सततं नमामि ॥५॥

यस्यास्ति हासो ननु मानवेभ्यः
यस्याधिवासश्च सदा जनेभ्यः ।
स्वस्मै स्वरूपं नहि यस्य लोके
तं नीलकण्ठं सततं नमामि ॥६॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ध्यायन्ति यं योगबलेन योगे
सद्योगिनो ध्यानरताः स्वभूमौ ।
पश्यन्ति नित्यं विभुमात्मरूपं
तं नीलकण्ठं सततं नमामि ॥७॥

आनन्ददाता भुवनस्य भर्ता
त्राता भयस्याथ नृणां पृथिव्याम् ।
यो दुर्जनानां सतत प्रहर्ता
तं नीलकण्ठं सततं नमामि ॥८॥

नीलकण्ठाष्टकं नव्यं रामाशीष – विनिर्मितम्
यात्रायां विजये नूनं पठनीयं शुभावहम् ॥

आदिकविं बाल्मीकिं वन्दे

दशरथपुत्रं रामं वन्दे
जनकनन्दिनीं सीतां वन्दे
रामानुजं लक्ष्मणं वन्दे
भ्रातृवत्सलं भरतं वन्दे ।
सौमित्रिं शत्रुघ्नं वन्दे
महावीर — हनुमन्तं वन्दे
एषां चरितं यत्र गुम्फितं
तत्काव्यं वाल्मीकेर्वन्दे ॥१॥
आदिकविं वाल्मीकिं वन्दे

रघुकुलरीतिर्यत्र वर्णिता
येन रामभक्तिः प्रदर्शिता
पतिव्रताया यत्र गुम्फनं
रामराज्यमिह पूर्णवर्णितम् ।
प्रेम्नो यत्र पवित्रचित्रणं
नीत्या सततं प्रजा पालनम्
जगत्पालकं विष्णुं वन्दे
काव्यं तद्वाल्मीकेर्वन्दे ॥२॥
आदिकविं वाल्मीकिं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ऋषिशृङ्गी जामाता यत्र
पुत्रेष्टि यज्ञं हि चकार
विष्णुर्नररूपं ननु धृत्वा
दशरथभवने जन्म दधार।
योद्धुं योग्या नैवाऽऽयोध्या
नामगुणैरपि पूर्णा पूज्या
रामजन्म — पूता विख्याता
येन वर्णिता तं किल वन्दे ।।३।।

आदिकविं वाल्मीकिं वन्दे

पात्रे धृत्वा दिव्यपायसं
पुरूषो यज्ञः समाजगाम
राजा हस्ते पात्रं नीत्वा
यज्ञपूरूषं तदा ननाम।
अर्द्धं दत्तं कौसल्यायै
राज्ञा कैकेय्यै पुनरर्द्धं
कनिष्ठिकायै ताभ्यां दत्तं
ताभिर्भुक्तञ्चान्नं वन्दे ।।४।।

आदिकविं वाल्मीकिं वन्दे

कौसल्याया रामो जातः
कैकेय्या भरतो विख्यातः
कौसल्यांशो वीरलक्ष्मणः
कैकेय्यांशः किल शत्रुघ्नः।
रामसन्निधौ यतो लक्ष्मणः
भरत सन्निधौ खलु शत्रुघ्नः
कनिष्ठिकायाः पुत्रौ जातौ
लक्ष्मणशत्रुघ्नौ तौ वन्दे ।।५।।

आदिकविं वाल्मीकिं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

विश्वामित्रः परमतपस्वी
Digitized by Arya Samaj Foundation Chennai and eGangotri
राजर्षिर्ज्ञानी च मनस्वी
प्रातः दशरथभवनं प्राप्तः
पाद्यार्घैः राज्ञा सुपूजितः।
ऋषिणा प्रोक्तं रामलक्ष्मणौ
यज्ञरक्षकौ सम्प्रति याचे
अतःपरं रघुरीतिं वन्दे
वाग्वद्धं राजानं वन्दे ॥६॥

आदिकविं वाल्मीकिं वन्दे

राज्ञा दत्तौ रामलक्ष्मणौ
यज्ञरक्षकावनु — गन्तारौ
विश्वामित्रश्चाग्रे गच्छति
द्वे विद्ये ताभ्यां प्रयच्छति।
बुभुक्षा शमनाय प्रयुक्तां
लोके पूज्यां सततमनिन्द्यां
बलामतिबलां विद्यां वन्दे
पूज्यं विश्वामित्रं वन्दे ॥७॥

आदिकविं वाल्मीकिं वन्दे

यज्ञे निरते विश्वामित्रे
तेनाहूते मन्त्रे पठिते
राक्षस्येका तत्राऽऽयाता
ताडकेति नाम्ना विख्याता।
भीषणमस्या यज्ञ-नाशनं
माया — भिस्तद्रूप - कल्पनम्
संगर्ज्यैनां जघान शूद्रां
रामो, राजकुमारं वन्दे ॥८॥

आदिकविं वाल्मीकिं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मिथिलायामायोजित यज्ञे
वीरा यत्राऽऽयाताः सर्वे
धनुर्गुरुत्वं भूपैः प्राप्तं
भञ्जनमस्य नृपेण न दृष्टम् ।
जगाद राजा वीरविरहिता
जाता धरा क्व सीतावरणं
धनुस्त्रोटितं तस्मिन् यज्ञे
सीतापतिना रामं वन्दे ॥९॥

आदिकविं वाल्मीकिं वन्दे

राज्यं दातुं राजा वाञ्छति
ब्रह्मर्षिं कुलगुरूञ्च पृच्छति
समयः कथितो गुरूणा तूर्णं
तीर्थजलैः कलशं परिपूर्णम् ।
आनितं सफलैः श्रुतिशीलै-
र्जगाम रामो मातुर्वचनैः
वनं विनीतं रामं वन्दे
सीतां वीरलक्ष्मणं वन्दे ॥१०॥

आदिकविं वाल्मीकिं वन्दे

अग्रे गच्छत्यग्रज — रामो
वीरलक्ष्मणश्चान्ते वामः
अरूणवल्कलैर्मध्या सीता
ब्रह्मवेदमध्ये ननु गीता ।
पंचवटीविपिने आयाता
शूर्पणखा यस्मिन् विख्याता
अंगयोर्यस्याश्च नाशकं
वीरलक्ष्मणं रामं वन्दे ॥११॥

आदिकविं वाल्मीकिं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मारीचेन सह दशवदनः
हेम्नश्छद्ममृगेण प्रसन्नः
रामविरहिताल्लक्ष्मणशून्यात्
सीतां भीतामरण्यभवनात् ।
जहार भिक्षा-छलेन सद्यः
निनाय लंकां वलेन दुष्टः
जटायुषं खे तदा जघान
जटायुषं खगराजं वन्दे ॥१२॥

आदिकविं वाल्मीकिं वन्दे

सुग्रीवं भयभीतं दृष्ट्वा
तालसप्तकं रामो भित्वा
रोमामनुजवधुं प्रतिलुब्धं
वानरराजवालिनं हत्वा ।
धर्मविरहितां पृथ्वीं भव्यां
चकार धर्मयुतां किल येन
तारा सुग्रीवेण गृहीता
दशरथनन्दनरामं वन्दे ॥१३॥

आदिकविं वाल्मीकिं वन्दे

हर्षोन्मग्नं सततं दृष्ट्वा
सुग्रीवं सालस्यं ज्ञात्वा
रामस्तं धृतवान्नाराचं
जगाद सुग्रीवो ननु वाचम् ।
सीतामन्वेष्टुं मम वीरा-
स्ततो व्रजन्तु दिक्षु रणधीराः
लङ्कां प्रति गच्छन्तं वन्दे
महावीरहनुमन्तं वन्दे ॥१४॥

आदिकविं वाल्मीकिं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

कपिः प्रवीरः सिन्धुं पश्यति
Digitized by Arya Samaj Foundation Chennai and eGangotri
मैनाकादुत्प्लवनं वाञ्छति
व्यासमुखीं सुरसां किल दृष्ट्वा
लघुरूपं तत्कालं धृत्वा।
पारे सिन्धुं जगाम वीरः
लङ्कायां प्रविवेश हि धीरः
सीताद्रष्टारं ननु वन्दे
महावीरकपिराजं वन्दे ॥१५॥

आदिकविं वाल्मीकिं वन्दे

इतस्ततो लङ्कायां गत्वा
वने ह्यशोके सीतां दृष्ट्वा
रामस्याभिज्ञानं दत्तं
रामायाभिज्ञानं पृष्टम्।
वनं नाशितं वीर — हनुमता
रावणबुद्धया नगरं दग्धम्
दग्धा लङ्का स्वल्पे काले
वीरवरं हनुमन्तं बन्दे ॥१६॥

आदिकविं वाल्मीकिं वन्दे

रामः सीतावृत्तं ज्ञात्वा
सुग्रीवस्य बलैः सह गत्वा
सेतुं तत्र बबन्ध सागरे
रामेशं संस्थाप्य तत्तटे।
जघान दुष्टं राक्षसराजं
दितिवंशासुरविभीषणस्य
अभिषेकं तत्रापि चकार
रामं रामेशं तं वन्दे ॥१७॥

आदिकविं वाल्मीकिं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जनकनन्दिनी सीता मुक्ता
राक्षसवृत्तिर्यदा विनष्टा
आयाता शिविरे ननु सीता
व्याघ्रभयादिव गौ भयभीता।
प्रज्ज्वलिते वह्नौ द्युतियुक्ते
विवेश सीता त्वरितं कथिते
लोकापवादशून्ये रामे
पूतां जनकनन्दिनीं वन्दे। ।१८॥

आदिकवि वाल्मीकि वन्दे

रामः पत्न्या भ्रात्रा सार्धं
वीरहनुमता वीरैः सहितम्
पुष्पकयाने सम्यक् तिष्ठन्
आयातो दृश्यं किल पश्यन्।
पुरीमयोध्यामधिक — सुरम्यां
भूमावपि नरलोके धन्याम्
रामराज्यमनु प्रथितं लोके
परंब्रह्म रामं ननु वन्दे ॥१९॥

आदिकवि वाल्मीकि वन्दे

१-कवितेयं संस्कृतसम्मेलनपत्रिकायां प्रकाशिता राँची आकाशवाणी केन्द्रात् प्रसारिता च वर्तते। अत्र षोडशमात्रावृत्तम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जगद्गुरुं श्रीकृष्णं वन्दे

पुरा भारते नगरी ख्याता
मथुरानाम्न्येका विख्याता
यत्रासीत् कंसः किल दुष्टः
राक्षसवृत्या सततं पुष्टः।
यस्याज्ञया प्रभूतं राज्ये
यज्ञयाजनं नष्टं याते
अवतारार्थं [धर्मविरहिते
भारतभूमौ विष्णुं वन्दे ॥१॥

जगद्गुरुं श्रीकृष्णं वन्दे

स्वसा देवकी तस्य हि पूता
वसुदेवेन तदा परिणीता
अष्टमगर्भात्तस्य हि नाशं
कंसः श्रुत्वा गगनाभाषम्।
हन्तुञ्चैच्छत् तौ क्षणमध्ये
ववन्ध शीघ्रं कारागारे
जघान सप्तप्रसूतान् बालान्
तदावतारं कृष्णं वन्दे ॥२॥

जगद्गुरुं श्रीकृष्णं वन्दे

अष्टमगर्भात् कृष्णे जाते
भाद्रकृष्णवसुरात्रौ मध्ये
निद्रामग्ने भृत्यसमूहे
वसुदेवेन धृतोऽसौ पात्रे।
व्रजनगरे संस्थाप्य गृहीता
नवप्रसूता तस्मै दत्ता
शिलापट्टके सा न गता तं
जगाद हन्ता ते मतिमन्दे ! ॥३॥

जगद्गुरुं श्रीकृष्णं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नन्दगृहे किलकति किल कृष्णः
ज्ञातः कंसेनाति प्रसन्नः
गता पूतना राक्षस्यैका
कंसप्रेषिता विषस्तनी सा।
कृष्णं दृष्ट्वा क्रीडासक्तं
निभृतं ज्ञात्वा विवेश भवनम्
दातुं पयो दधानोत्सङ्गे
कृष्णं वालं विष्णुं वन्दे ॥४॥

जगद्गुरूं श्रीकृष्णं वन्दे

क्रोडे गत्वा कृष्णस्तूर्णं
तस्याःस्तन्यं विषपरिपूर्णम्
ज्ञात्वा कपटरतां किल दुष्टां
विषकुम्भं खलु नीचां पुष्टाम्।
पपौ तदानीं दुग्धं रक्तं
प्राणान् तस्यास्तत्रासक्तान्
मृता गता चान्ते स्वर्लोके
सर्वं कृष्णप्रभावं वन्दे ॥५॥

जगद्गुरूं श्रीकृष्णं वन्दे

क्रीड़ा कृष्णस्यापि विचित्रा
व्रजभूमौ रचिता किल चित्रा
चञ्चलतायाः शान्त्यै मात्रा।
उदूखले बद्धो दृढरज्वा
चकर्ष कृष्णः उदूखलं तं
ह्यपातयत् पादपं विशालम्
तदा जनैर्दृष्टास्य च खेला
वालं व्रजाधिराजं वन्दे ॥६॥

जगद्गुरूं श्रीकृष्णं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्य प्रभावाद् यमुना श्यामा
भुवि विदिता दृश्यैरभिरामा
यस्यास्तटे कदम्ब – कदम्बे
वंशीं धृत्वा विहरति कृष्णे ।
गृहकार्यं त्यक्त्वा व्रजबालाः
पश्यन्ति हि कृष्णं मधुमालाः
स्नानरतानां वस्त्रहारकं
वंशीधरं तदानीं वन्दे ॥७॥

जगद्गुरुं श्रीकृष्णं वन्दे

कंसप्रेषितः श्रीअक्रूरः
आयातः कृष्णं प्रतिधीरः
जगाद दृष्ट्वा तं गोपेशं
कंसः कुटिलमतिर्देवेशम् ।
हन्तुमिच्छति मल्लप्राङ्गणे
आयोजिते स्वकीये नगरे
सत्यं प्रति प्रतिबन्धे युक्ते
वक्तारञ्चाक्रूरं वन्दे ॥८॥

जगद्गुरुं श्रीकृष्णं वन्दे

कृष्णो गच्छति मातुलगेहं
भ्रात्रा बलरामेण सहैवम्
कृष्णो दृष्टो नगरवासिभिः
रजकैस्ताभ्यां वस्त्रं दत्तम् ।
माला दत्ता मालाकारै-
र्विप्रैर्गोरोचनञ्च दत्तम्
मल्लप्राङ्गणे कंसादीनां
वीराणां हन्तारं वन्दे ॥९॥

जगद्गुरुं श्रीकृष्णं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अध्ययमार्थं ब्राह्मा सार्धं
गुरूभवनं श्रीकृष्णो यातः
सान्दीपनिगुरूणाञ्चितनिगमे
उज्जयिनीनगरे आयातः।
ताभ्यां सर्वा विद्या पठिता
चतुष्षष्ठिदिवसाल्पे काले
सेवायां गुरूपुत्रो दत्तः
यमसदनाल्लघुवालं वन्दे ॥१०॥

जगद्गुरूं श्रीकृष्णं वन्दे

अधीतिकाले यस्य सुदामा
उज्जयिनीवासी ह्यभिरामः
विप्रो धनहीनो ननु मित्रं
साकं सार्धं तेन सहैवम्।
निवसति पठति करोति च कार्यं
खादति कन्दमूलफलखाद्यम्
यस्य भावना विलसति हृदये
विप्रं सुदामानं वन्दे ॥११॥

जगद्गुरूं श्रीकृष्णं वन्दे

देवर्षिर्वीणां ननु धृत्वा
द्वारकेति पुर्य्यामायातः
सन्देशं शक्रस्य तदानीं
कृष्णसमक्षे ततो जगाद।
उद्धववलरामौ यत्रास्तां–
कृष्णस्तत्र मन्त्रणां चकार
युधिष्ठिरेणायोजितयज्ञे
तदा व्रजन्तं देवं वन्दे ॥१२॥

जगद्गुरूं श्रीकृष्णं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिशुपालं क्रूरं बलवन्तं
दुष्टाचरण — प्रचारण — दक्षम्
देवनिन्दकं मूर्तिभञ्जकं
धर्मविहीनं वेददूषकम् ।
दृष्ट्वा दोषशतं तं हित्वा
धर्मराजयज्ञे बहुमत्वा
चक्रेणास्य चकर्त शिरस्तत्
कृष्णो धर्मरक्षकं वन्दे ॥१३॥

जगद्गुरुं श्रीकृष्णं वन्दे

विश्वसागरे पोतवाहको
धर्मसंगरे रथं चालयति
मोहाच्छन्नमर्जुन दृष्ट्वा
रूपं तस्मै निजं दर्शयति ।
ज्ञानकर्म — संन्यास - संयुतं
तत्त्वं दत्वा धर्मं रक्षति
यस्याज्ञया धनुःस्वं धृत्वा
शत्रूञ्जयति भारतं वन्दे ॥१४॥

जगद्गुरुं श्रीकृष्णं वन्दे[1]

१-कवितेयं संस्कृतसम्मेलनपत्रिकायां प्रकाशिता राँची आकाशवाणीत प्रसारिता वर्तते ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

माता यस्याञ्जना मनोज्ञा
लोके पूज्या सततमनिन्द्या
अमितगतिर्जनको विख्यातः
भीमः पवनो देवाख्यातः।
पितुर्गुणस्याधानं कृत्वा
बाल्ये बालरविं ननु दृष्ट्वा
मत्वा पक्वफलं स्वे वदने
यो दधार तं बालं वन्दे ॥१॥

वीरवरं हनुमन्तं वन्दे

बालो बाल्ये क्रीड़ां रचयति
चाञ्चल्य चाधिकं दर्शयति
पितुर्गुणस्तत्रापि राजते
वारिदमध्ये रविः भ्राजते।
पवनप्रेरिते विपुल वारिदे
यथारविः प्रच्छन्नो गच्छति
वायुसुतस्य मुखस्य गह्वरे
तथा विशन्तं सूर्यं वन्दे ॥२॥

महावीरं हनुमन्तं वन्दे

अन्तर्हितेरवौ किल भुवनं
देवैर्दृष्टं तमसा पूर्णम्
विख्यातो देवेन्द्रो वज्रैः
यदा मुखे ताडनं चकार।
तदा मुखान्निर्गतः खेचरः
खे गन्तुं ननु बलं बभार
यया क्रीडया देवाः सर्वे
हृष्टास्तानपि देवान् वन्दे ॥३॥

वीरवरं हनुमन्तं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतस्य दक्षिण प्रदेशे
किष्किन्धा नगरी विख्यातः
यत्र नृपो वाली वलशाली
लब्ध्वा वरं प्रमत्तो जातः।
यस्य भयादनुजः सुग्रीवः
त्यक्त्वा गृहं पर्वते यातः
शोकहारकं वायुनन्दनं
तथा चकार मन्त्रिणं वन्दे ॥४॥

वीरवरं हनुमन्तं वन्दे

ऋष्यमूक — पर्वते मनोज्ञे
सुग्रीवः पुरूषौ द्वौ पश्यति
धनुष्धारकौ तौ ननु दृष्ट्वा
हनुमन्तं भीत्या स पृच्छति।
कौ पुरूषौ ननु धनुष्धारकौ
किञ्चापद्ग्रस्तोऽत्र निवासः
पुरूषौ द्रष्टुं तदा व्रजन्तं
वीरवरं धीमन्तं वन्दे ॥५॥

महावीर हनुमन्तं वन्दे

स्वं रूपं त्यक्त्वा मतिधीरः
सौम्यवपुः विप्रस्य दधार
दृष्ट्वा दिव्यनरौ तौ वीरौ
गत्वा तत्र च नमश्चकार।
वृत्तं ज्ञात्वा धर्मपालको
रामं बुद्ध्वा मुदं वभार
मैत्री रामस्यापि कारिता
राज्ञा येन समं तं वन्दे ॥६॥

वीरवरं हनुमन्तं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

सीता हृतेति ज्ञात्वा वीरः
Digitized by Arya Samaj Foundation Chennai and eGangotri
रामं दुःखनिमग्नं धीरः
आज्ञां सुग्रीवस्य गृहीत्वा
रामस्यापि च दूतो भूत्वा ।
दक्षिणदिशि शुभलग्ने गच्छति
सीतामन्वेष्टुं किल पृच्छति
शीघ्रं जलधितटे सम्प्राप्तं
खगराजं सम्पातिं वन्दे ॥७॥

वीरवरं हनुमन्तं वन्दे

गृध्रः सम्पाति खलु तत्र
सीतावृत्तं तदा जगाद
आयामितमुदधिं किल ज्ञात्वा
वीराः सर्वे चकिता जाताः ।
परं प्रसन्नो वायुनन्दन
स्तं तर्त्तुं तत्परो वभूव
गदां गृहीत्वा ध्यात्वा रामं
सीतां स्मरति जानकीं वन्दे ॥८॥

वीरवरं हनुमन्तं वन्दे

येन सिद्धयस्तथा च निधयः
प्राप्तास्तथा च दत्ता लोके
योगवलैर्यस्यास्ति पवित्रं
चित्तं वचश्च सूर्यशासनैः ।
दिव्यं तेजो यस्य शरीरे
वलं समस्तं रामप्रभावात्
तर्त्तुं योग्यो योऽस्ति समुद्रं
रामचन्द्रदूतं तं वन्दे ॥९॥

वीरवरं हनुमन्तं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपिः प्रवीरः सिन्धुं पश्यति
मैनाकादुत्प्लवनं वाञ्छति
व्यासमुखीं सुरसां किल दृष्ट्वा
लघुरूप तत्कालं धृत्वा ।
पारे सिन्धुं जगाम वीरः
लङ्कायां प्रविवेश हि धीरः
सीताद्रष्टारं कपिराजं
अमितवलं वलवीरं वन्दे ॥१०॥
वीरवरं हनुमन्तं वन्दे

इतस्ततो लङ्कायां गत्वा
वने ह्यशोके सीतां दृष्ट्वा
रामस्याभिज्ञानं दत्तं
वृत्तं तस्यै सर्वं कथितम् ।
अहं कपिः रामस्य किङ्करः
दितिसुतदलने किल भयङ्करः
पूर्वं कथितं येनेदानीं
तं वीरं वलवन्तं वन्दे ॥११॥
महावीरहनुमन्तं वन्दे

सीतायाः कारुण्यं ज्ञात्वा
दुःखाधिक्याद्द्रवितो भूत्वा
कपिना कथितं तया तदानीं
हे मातः श्रृणु वचो इदानीम् ।
त्वं माताऽहं पुत्रो वीरः
कार्यं तत्र साधनेऽस्मि धीरः
रामं दर्शयितुं किल सीता
येन सूचिता तं किल वन्दे ॥१२॥
वीरवरं हनुमन्तं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीमत्यं यदि रामदर्शने
मम पृष्ठे तिष्ठतु हे मातः
रामलक्ष्मणौ द्रक्ष्यसि शीघ्रं
तत्र यास्यसि शिविरे प्रातः ।
परं गन्तुमुचितं नहि तत्र
नाशं विना दैत्यराजस्य
हते राक्षसे तत्र प्रभावात्
ध्रुवं भविष्यति गमनं वन्दे ॥१३॥

वीरवरं हनुमन्तं वन्दे

कपिकुलसंभूतोऽहं मातः
रामकार्यसाधने प्रयातः
मार्गे मया न भुक्तं किञ्चित्
बुभूक्षितस्तव पुत्रो दासः ।
लङ्काया उद्यानं द्रष्टुं
नानाविधानि फलानि भोक्तुम्
आदेशं याचे मौनां तां
दृष्ट्वा ततो व्रजन्तं वन्दे ॥१४॥

वीरवरं हनुमन्तं वन्दे

भुक्तं फलञ्च लतास्त्रोटिता
कपिस्वभावस्तत्र दर्शितः
वृक्षाः पत्रयुताश्च समस्ताः
छिन्नाभिन्नास्तेन च याताः ।
रक्षिणोऽथ पालकाः प्रमत्ताः
शाखापतनैर्हताः समस्ताः
हीनाङ्गा विकृताङ्गा येन
कृतास्तत्र बलवन्तं वन्दे ॥१५॥

वीरवरं हनुमन्तं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लङ्कापतिना वृत्तं ज्ञात्वा
कपिराजं बलवन्तं मत्वा
वीरसैनिकास्तत्र प्रेषिता
विविधैः शस्त्रास्त्रैः समन्विताः ।
कपिना बलवीरेण तदानीं
नानारूपधरेण समस्ताः
वीरा मृताऽथ ध्वस्ता याताः
स्वैरं येन चरन्तं वन्दे ॥१६॥

वीरवरं हनुमन्तं वन्दे

लंकाधीशो वृत्तं ज्ञात्वा
हतान् समस्तान् वीरान् दृष्ट्वा
मेघनाद — पुत्रं बलवन्तं
जगाद लघुजीवस्य च कृत्यम् ।
रावणपुत्रो वृत्तं श्रुत्वा
मेघगर्जनं तदा चकार
बलशालीं सेनां किल नीत्वा
पश्यति हनुमन्तं तं वन्दे ॥१७॥

महावीरं हनुमन्तं वन्दे

कपिना दृष्टो रावण — पुत्रः
मेघनादनाम्ना विख्यातः
यस्य सैनिका मदमत्तास्ते
बलवीरा बहुरूपाः प्रातः ।
उत्पाट्यैकं वृक्षं शीघ्रं
हताः समस्तास्तेन सैनिकाः
ब्रह्मास्त्रेणैं कपिं बबन्ध
दैत्यसभासीनं तं वन्दे ॥१८॥

वीरवरं हनुमन्तं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दैत्यराट् कपिराजं पृच्छति
कस्त्वं कथं समायातः इति
ब्रूते कपिः रामदूतोऽहं
सीतामन्वेष्टुञ्चायातः ।
उद्याने तव सुतः शृगालो
ब्रह्मास्त्रैर्मां दृढं बबन्ध
इदमस्ति ब्रह्मास्त्र — महत्त्वं
दिव्यं ब्रह्मास्त्रं नूनु वन्दे ॥१९॥

वीरवरं हनुमन्तं वन्दे

तत्र नगरी भव्यातिविशाला
स्वर्णनिर्मिता यस्याः शाला
चौरराट् त्वं यत्र भ्राजते
कलंकितो वीरोऽद्य दृश्यते ।
चौरो ब्राह्मणवेषं धृत्वा
मृगयासक्तं रामं दृष्ट्वा
छद्मवलेन हि जगन्मातरं
जहार किल तां सीतां वन्दे ॥२०॥

वीरवरं हनुमन्तं वन्दे

ब्राह्मणवंशे जन्म गृहीत्वा
साङ्गं वेदं यो हि दधार
मातृकुलस्य च रक्त — बलेन
नव्यं वीर्यं बलं बभार ।
ब्रह्मा ते तपसा सन्तुष्टः
भक्त्या शिवः प्रसन्नोजातः
व्यर्थं सर्वं चौरकर्म्मणा
येन दुःखितां सीतां वन्दे ॥२१॥

महावीर हनुमन्तं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कपिराजस्य हि वाक्यं श्रुत्वा
लंकेशः क्रोधान्धो जातः
बलवन्तं कपिराजं मत्वा
हन्तुं शीघ्रं तदा प्रयातः।
विभीषणो ब्रूते लंकेशं
नहि वध्यो भ्रातः दूतोऽयम्
शास्त्रज्ञो भोः पश्यतु शास्त्रं
विभीषणं दितिपुत्रं वन्दे ॥२२॥

वीरवरं हनुमन्तं वन्दे

श्रुत्वा भ्रातृवचो लंकेशः
ज्ञात्वा ध्यात्वा नीतिप्रवीणः
हत्या दूतस्यापि न शास्त्रे
विहिताऽवध्यो दूतो दीनः।
दूतस्याङ्गं भङ्गं कर्त्तुं
प्रियपुच्छं तं कपिं स पश्यति
ब्रूते लाङ्गूलं दग्धुं किल
यस्य शुभं लाङ्गूलं वन्दे ॥२३॥

वीरवरं हनुमन्तं वन्दे

कपिपुच्छं तुच्छं किल मत्वा
वस्त्रं किञ्चित् तत्र वेष्टितम्
आयामिते तदानीं पुच्छे
वस्त्रं तत्राधिकं वेष्टितम्।
लंकाया वस्त्रञ्च समग्रं
लांगूलस्यावरणे लग्नम्
पुच्छांशं तत्राप्यव — शिष्टं
सर्वं कपिप्रभावं वन्दे ॥२४॥

वीरवरं हनुमन्तं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लंकेशः कपिपुच्छं दृष्ट्वा
वस्त्राञ्चितं पर्वतं मत्वा
शङ्काग्रस्तो मूढो भूत्वा
ज्वालयेति सहसा स जगाद।
दीप्ते वह्नौ कपि — प्रवीरः
सहसोत्थाय गृहेषु प्रयातः
उत्प्लवनं यस्यास्ति महत्त्वं
गृहाद्गृहं गच्छन्तं वन्दे ॥२५॥

वीरवरं हनुमन्तं वन्दे

अग्निर्देवश्चिन्तामुक्तो
विकरालं रूपं हि दधार
ऊर्ध्वज्वलनं यस्य प्रसिद्धं
लंकायां तद् भृशं बभार।
गृहे गृहे ज्वालाति—विशाला
ऊर्ध्वं गच्छति पाटल—माला
वप्रक्रीडासक्तां धूमैः
स्वर्णनिर्मितां लंकां वन्दे ॥२६॥

वीरवरं हनुमन्तं वन्दे

लंकां दग्ध्वा कपिस्तदानीं
स्नातुं जलधिजले हि विवेश
वडवाग्निर्विजयं स्वं लब्ध्वा
सायं ननु सदने सम्प्राप्तः।
स्नात्वा पवनगतिः कपिमुख्यः
रामं द्रष्टुं ततः प्रयातः
रामं दृष्ट्वा शिरसा नत्वा
सन्देशं दातारं वन्दे ॥२७॥

महावीरहनुमन्तं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतस्य केरल — प्रदेशे
कालटीति नगरे विख्याते
शिवाराधिते शिवगुरू — सदने
आर्यम्बाञ्चित — भव्ये भवने।
तुष्टः शिवः स्वजन्म दधार
आर्यम्बा ननु सुतं बभार
नवजातं शङ्करनामानं
द्वैतभिन्नमद्वैतं वन्दे ॥१॥

आदिशङ्कराचार्यं वन्दे

अवतारो धर्मग्लानौ सति
भारतदेशे सदा जायते
परं ब्रह्म निर्गुणभूतोऽपि
सगुणत्वं ननु सदा प्राप्यते।
बौद्धाचार - प्रचारित — देशे
वैदिक — धर्मान्तरिते जाते
आविर्भावो यस्य पृथिव्यां
तं शिवांशजं देवं वन्दे ॥२॥

आदिशङ्कराचार्यं वन्दे

अल्पे वयसि चाष्टमे वर्षे
परा चापरा विद्याऽधीता
मात्रादिष्टो ग्राहान्मुक्तो
मिथ्या माया तदा वञ्चिता।
संन्यासस्तत्क्षणे गृहीतस्
तेन योगबल — युक्तो जातः
सत्यं ब्रह्म जगन्मिथ्या किल
वक्तारं भगवन्तं वन्दे ॥३॥

आदिशङ्कराचार्यं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

देशे वैदिक धर्मजयाय
नास्तिक — बौद्धोपरि विजयाय
धर्मपताकां हस्ते धृत्वा
शास्त्रार्थस्योद्घोषं कृत्वा।
भवने गत्वा बौद्धपण्डितान्
शास्त्रार्थे ननु गर्वमण्डितान्
पराजित्य तेभ्यो धर्मस्य
दीक्षा — दातारं तं वन्दे ॥४॥

आदिशङ्कराचार्यं वन्दे

पराजिताः केचन् पलायिता
श्चीन — तिब्बत — लंकावर्मासु
अन्ये वैदिकधर्म — दीक्षिता
स्तत्त्वचिन्तकाः शान्तिं प्रापुः।
भारतभूमौ कोणे कोणे
विजय — पताका यस्य दृश्यते
ब्रह्मर्षिं वंद्यं विख्यातं
जगद्गुरूं तं देवं वन्दे ॥५॥

आदिशङ्कराचार्यं वन्दे

विजय—प्रसङ्गे भारतिसदने
गत्वा माहिष्मती — नगर्य्याम्
मण्डनमिश्र — वरेण चकार
शास्त्रार्थं मिश्राञ्चित—पुर्य्याम्।
एकस्मिन् पक्षे युवनेता
पर — पक्षे मीमांसाचार्यः
मध्यस्था भारती तदानीं
ब्रूते युवनेतारं वन्दे ॥६॥

आदिशङ्कराचार्यं वन्दे

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रह्मसूत्र — वेदान्त — समुद्रात्
भव्यं भाष्यं मणि चकर्ष
भगवद्गीता — भाष्यं दृष्ट्वा
विज्ञः सर्वोभृश जहर्ष ।
विज्ञानामृतमद्य विजयते
यथा त्रिपथगा नदी शोभते
यत्र वर्णितं ज्ञान—समग्रं
दिव्यं शाङ्करभाष्यं वन्दे ॥७॥

आदिशङ्कराचार्यं वन्दे

उत्तरदिशि वदरीक — प्रदेशे
दक्षिणदिशि काञ्चीकनगर्य्याम्
द्वारकेतिनगरे पश्चिम — दिशि
जगन्नाथपुर्य्यां ननु प्राच्याम् ।
दिक्षु चतसृषु राजन्ते खलु
मठाश्चतुः संख्यायां यस्य
धर्मरक्षणे सदा समर्थाः
तं नरपूज्यं देवं वन्दे ॥८॥

आदिशङ्कराचार्यं वन्दे

रामाशीष- विनिर्मितं सुखकरं श्री शकरस्याष्टकं
भव्यं भूतियुतं भयापहरणे मंत्रोपमं भास्वरम् ।
आद्याचार्यगुणानुकीर्तनपरं धर्मार्थमोक्षप्रदं
गेयं स्तोत्रमथाद्भुतं भुविसृतं प्रातः सदा मानवैः ॥[1]

१—सूर्योदय :—(वाराणसी) पत्रिकायां परम-ज्ञान-प्रकाश पत्रिकायाञ्च प्रकाशितम् ।

—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारती वल्लकीवादने तिष्ठति

(स्रग्विनी)

सर्वशुक्ला स्वयं हंसयानस्थिता
क्रोधमोहादिभिर्वञ्चिता राजते।
पुस्तकं रागसंवर्द्धकं वल्लकीं
धारयन्ती रमन्ती सदा गच्छति ॥१॥

भारती वल्लकीवादने तिष्ठति

वल्लको तन्तुभिः संयुता शोभते
शुष्ककाष्ठेन सन्निर्मिता भ्राजते।
स्वैर्नखैर्वादयन्ती शुभां वल्लकीं
ज्ञाननीरेण शुष्कं मनः सिञ्चति ॥२॥

भारती वल्लकीवादने तिष्ठति

रागमित्थं नवं प्रेमपूर्णं शुभं
वादय ज्ञानदात्रीह भूमौ सदा।
प्रेमभावेन संप्लाविता मानवा
ज्ञानिनो येन निष्ठान्विता भारति ॥३॥

भारती वल्लकीवादने तिष्ठति

यैः श्रुतं वल्लकी — वादनं शोभनं
तैः कृतं काष्ठभूतं मनः पावनम्।
सा प्रभूतं घनं विद्यया सन्निभं
ज्ञानगंगाजलं सर्वदा यच्छति ॥४॥

भारती वल्लकी वादने तिष्ठति

यैर्न पीतं सुधाप्लावितं पावनं
ज्ञानगंगाजलं श्रोत्रपेयं शुभम्।
जन्म तेषां गतं व्यर्थतां भूतले
गायतीवातिगीतं सदा वल्लकी ॥५॥

भारती वल्लकी वादने तिष्ठति

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

उत्तरस्यां दिशायां हिमाद्रिः शुभो
यत्र रक्षाव्रतीवाथ संतिष्ठते।
औषधं रत्नभूतं समग्रं फलं
मुक्तहस्तैर्ददाति प्रभूतं सदा ॥१॥

भारती भारते भासतां सर्वदा

दक्षिणस्यां दिशायां समुद्रः सदा
क्षालयन्यत्र पादौ पृथिव्याः स्थितः।
पूर्वभागे तथा पश्चिमायामपि
वस्त्रभूतौ समुद्रौ स्थितौ सर्वदा ॥२॥

भारती भारते भासतां सर्वदा

ग्रीष्महेमन्तवर्षाशरन्माधवाः
कालभागत्य शीतादयश्शेरते।
धन्यधान्येन युक्ता यतो यत्र भूः
कामभद्रेव दात्री शुभं कामदा ॥३॥

भारती भारते भासतां सर्वदा

सर्वदा गामिनी यत्र भागीरथी
सर्वशुक्लाम्बरा भासुरा भारती।
पुण्यतोया सदा कृष्णलीलानदी
मिश्रिताः पुण्यभूमौ महामोक्षदा ॥४॥

भारती भारते भासतां सर्वदा

यत्र कृष्णा सदा नीरयुक्ता शुभा
यत्र गोदावरी नर्मदा गण्डकी।
फल्गुशिप्रा—विपाशा—शुतुद्र्यादयो
यत्र नद्यो वहन्ति प्रवाहान्विताः ॥५॥

भारती भारते भासतां सर्वदा

CC-0.Panini Kanya Maha Vidyalaya Collection.

मेदिनी भासुरा सज्जलैः सिञ्चिता
Digitized by Arya Samaj Foundation Chennai and eGangotri
सस्यपूर्णा सदा जायतां भासताम् ।
पादपाः कल्पवृक्षाः फलैः संयुताः
सन्तु दानेन युक्ताः सदा लाभदाः ॥६॥

भारती भारते भासतां सर्वदा

व्यास-वाल्मीकिभासादयः प्रेरकाः
कालिदासाश्वघोषामरा भार्गवाः ।
भारतं रामवृत्तं क्रमं नाटकं
पद्यगद्यात्मकं काव्यकोषप्रदाः ॥७॥

भारती भारते भासतां सर्वदा

लब्धवान् गौतमो ज्ञानमेवं यतः
सत्यधर्माश्रितं तेजसा संयुतम् ।
हिंसयाहीनमित्थं गयायां पुरा
वृक्षमूलस्थितो भारते ह्येकदा ॥८॥

भारती भारते भासतां सर्वदा

भारतस्यात्मनो भावनां भावयन्
ज्ञानदीपस्य तेजः समुत्तेजयन् ।
व्याततानात्र बन्धुत्वभावं शुभं
बुद्धदेवो हि लोके मतं तेजसा ॥९॥

भारती भारते भासतां सर्वदा

जैनबौद्धात्मकं नास्तिकं दर्शनं
चारूवाक्यात्मकं यत्र संदर्शितम् ।
सांख्ययोगादिकं न्यायवैशेषिकं
दर्शनं षड्विधञ्चास्तिकं धीमता ॥१०॥

भारती भारते भासतां सर्वदा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शङ्करः शङ्कराचार्यभूतो भुवि
द्वैतभिन्नं मतं यत्र संस्थापयन् ।
अल्पकालेऽथ धर्मस्य संस्थापन
व्याकरोद् ज्ञानयोगेन यः सर्वथा ॥११॥

भारती भारते भासतां सर्वदा

रामराज्यं शुभं सद्युगानन्तरं
राजतन्त्रेषु यत्रैव संराजते ।
प्रेमतन्त्रं महत्कृष्णराज्ये पुनः
द्वापरे दृश्यतां कर्मतन्त्रं तथा ॥१२॥

भारती भारते भासतां सर्वदा

रावणः कुम्भकर्णादयो राक्षसाः
रामवाणैर्हता यत्र नाकं गताः ।
भारते संगरे नाशिताः कौरवा
येन कृष्णेन कंसादयो भूभृता ॥१३॥

भारती भारते भासतां सर्वदा

भारती पीडिता भारतं पीडितं
शासकैराङ्ग्ल देशस्य संशोषकैः ।
हिंसया हीन – मान्दोलनैर्यत्र ते
पङ्कलिप्ताः स्वदेशं प्रति प्रस्थिताः ॥१४॥

भारती भारते भासतां सर्वदा

लोकतन्त्रेण देशस्य संचालनं
लोककल्याणहेतोः शुभं क्रीडनम् ।
कल्पनं जल्पनं पालनं चिन्तनं
यत्र भाव प्रकाशे सदा स्वात्मता ॥१५॥

भारती भारते भासतां सर्वदा

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र दोलयते न त्रिरंगो ध्वजः
सस्यपूर्णस्य देशस्य संसूचकः।
पौरुषस्यात्म – सत्यस्य संज्ञापकः
लोकनम्यः सुरम्यः सुपूज्यस्तथा ॥१६॥

भारती भारते भासतां सर्वदा

संस्कृतिर्भूतले यस्य सम्मानिता
सभ्यता वैदिकी यत्र संभूषिता।
भारतीया मतिर्भावना राष्ट्रिया
संस्तुता मानवैर्विश्ववन्द्यैः सदा ॥१७॥

भारती भारते भासतां सर्वदा

ज्ञानशून्या जना राज्यसंचालका
अन्धकारावृता मत्सराः स्वार्थिनः।
उल्लुकस्यैव दृष्ट्या युताऽत्रस्थिता
ज्ञानवन्तो भवन्तु प्रसन्नास्तथा ॥१८॥

भारती भारते भासतां सर्वदा

गच्छतात् तत्तमो भारताद् भूतलाद्
ज्ञानपुञ्जप्रभा भासतां दीप्यताम्।
वीरभोग्या मही कर्मभोग्या मही
वीरकर्मा हि ते राजतां सर्वदा ॥१९॥

भारती भारते भासतां सर्वदा

शासको द्वेषरागादिभिः प्रेरित
श्चाटुकाशावृतो लोललासैर्युतः।
यः प्रजा कष्टदो न प्रजापालकः
सो ह्यधो गच्छताद् भारतादञ्जसा ॥२०॥

भारती भारते भासतां सर्वदा

CC-0.Panini Kanya Maha Vidyalaya Collection.

ज्ञानमार्गेण सत्यश्रमैः केवलं
Digitized by Arya Samaj Foundation Chennai and eGangotri
राज्यसंचालनं वा प्रजापालनम् ।
योजना चापि सत्याश्रिता राजतां
देशकल्याणहेतोः सदा लक्ष्यदा ॥२१॥
भारती भारते भासतां सर्वदा

राज्यमेतद् भवेद् ज्ञानमार्गाश्रितं
कर्मदक्षाः प्रजाः सौख्यदं पालनम् ।
लुण्ठनं लुञ्चनं पीडनं स्वैरणं
भारताद् गच्छतादञ्जसा सर्वथा ॥२२॥
भारती भारते भासतां सर्वदा

भारतीया जना भारती - सेवका
भारतस्यास्य रक्षाव्रते संस्थिताः ।
हिन्दवो मुस्लिमा जैनसिक्खादयः
सन्तु राष्ट्रान्विता भारते सर्वदा ॥२३॥
भारती भारते भासतां सर्वदा

राष्ट्रभावान्विता चात्र विद्या भवेत्
संस्कृता राष्ट्रभाषा च हिन्दी भवेत् ।
नागरीदेवलिप्यां भवेल्लेखनं
शासने ह्याङ्ग्लभाषा न भूयात् सदा ॥२४॥
भारती भारते भासतां सर्वदा

राष्ट्र पुष्पं सरोजं शुभं सुन्दरं
राष्ट्रपक्षी मयूरस्तु नृत्ये रतः ।
राष्ट्रगानं जनानां कृते मंगलं
राष्ट्रमानं पृथिव्यां भवेत् सर्वदा ॥२५॥[1]
भारती भारते भासतां सर्वदा

१— सूर्योदय (वाराणसी) पत्रिकायां ६२ वर्षे १, २, ३ संयुक्ताङ्के प्रकाशिता, राँची आकाशवाणीकेन्द्रात् प्रसारिता चेयं कविता ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानविज्ञानशास्त्रं तु यस्याज्ञया
तूर्णमाप्नोति लोके मनुष्यः सदा।
भासुरा भानुवद् भ्रान्तिहा शान्तिदा
ज्ञानरूपा सदा ज्ञानदा भारती ॥१॥
भारते भातु भव्या शुभा भारती

साऽस्ति पूज्या तथा श्लाघनीया सदा
बुद्धिरूपा सुरूपा सुभव्याम्बरा।
विश्ववन्द्याविलस्यापहा दुःखहा
धर्मभूता स्वयं धर्मिणी भारती ॥२॥
भारते भातु भव्या शुभा भारती

वेद — वेदाङ्गसाहित्यमत्यद्भुतं
सर्वशास्त्राणि षड्दर्शनानि स्वयम्।
धर्मशास्त्राणि नूनं पुराणानि च
साऽसृजद् भारते भास्वरा भारती ॥३॥
भारते भातु भव्या शुभा भारती

आदिकाव्यं महाभारतञ्च क्रमात्
नाट्यशास्त्रादिकं योगशास्त्राणि च।
काव्यभूतञ्च यत् पद्यगद्यात्मकं
साऽसृजद् भारते वन्दिता भारती ॥४॥
भारते भातु भव्या शुभा भारती

संकटे शत्रुयुक्ते विभेदाञ्चिते
भारतेऽखण्डताभङ्गभीतिश्रिते।
व्याकरोद्देशभक्तिं तथैवैकतां
येन श्रीः भारते राजते भारती ॥५॥
भारते भातु भव्या शुभा भारती

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नेहरोः शास्त्रिणो गांधिनो या प्रभा
दृश्यते सर्वदेशेषु सत्याश्रिता।
विद्युदादेर्विकासाय यत्साधनं
चारु सत्यं तवैवास्ति तद्भारती ॥६॥
भारते भातु भव्या शुभा भारती

वायुयानान्यहो धूम्रयानान्यपि
सन्ति राकेटकाश्चान्तरिक्षाय ये।
शाश्वतं भारते भान्ति भव्या शुभा
ते प्रसादात् तवैवात्र हे भारति ! ॥७॥[1]
भारते भातु भव्या शुभा भारती

विश्वकविः किल कालीदासः

विद्या नाम्नी यस्य मनोज्ञा
नृपकन्या पत्नी ननु योग्या
मूर्खोऽयमिति ज्ञात्वा पूर्णं
त्यक्तवती गृहतो यं तूर्णम्।
तिरस्कृतः कालीं प्रति गत्वा
तां देवीं मनसा संध्यात्वा
उपासनाभिर्ज्ञानं लब्ध्वा
पृच्छति पत्नीमिह ते दासः।
परं ब्रवीति राजमदपूर्णा
अस्ति ते कश्चिद् वाग्विलासः
ब्रूते भारतभूमौ सत्यं
विश्व कविः किल कालीदासः ॥१॥

१—आयामपत्रिकायां प्रकाशितेयं कविता।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिपालनमस्याः शब्दानां
गतः कविः किल काव्यप्रदेशे
लघुत्रयीं तां तथा चकार
विदिता या खलु पत्न्यादेशे।
अस्तीति तत् कुमारसंभवं
मेघदूतमिति कश्चिच्छन्दात्
वागर्थाविव रघुवंशं तत्
सर्वं खलु शिवभक्तिप्रभावात्।
अपमानः पत्न्या ननु रचितो
यस्मिन् तस्याः शब्दविकासः
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदासः ॥२॥

शकुन्तलायाः प्रेमवर्णने
शाकुन्तलमिति नाट्यं रचितम्
उर्वश्याः प्रेम्नाभिरूपकं
उर्वशीयमपरं किल नाट्यम्।
अग्निमित्रः परमप्रतापी
मालविका दृष्टा किल येन
रहसि सुन्दरी मालविकाऽपि
मिलिता तेन च छद्मवलेन।
मालविकाग्निमित्रे ननु लिखितः
यस्याः प्रेम्ना युक्तो हासः
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदासः ॥३॥

स्वकर्त्तव्यप्रमत्तो यक्षः
वर्षभोग्यशापेन स रूक्षः
पश्चात्तापपूर्वकं विचरन्
रोदिति निजभाग्यं किल निन्दन्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कर्तव्येन विहीनो लोके
पश्यति फलं तस्य निजभोगे
कर्मसिद्धिसिद्धान्त — विहीनैः
सर्वं दुःखं लब्धं दीनैः।
नापि विलासो नापि च हासः
केवलमत्र हि यक्ष — प्रवासः
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदासः ॥४॥

मेघो गच्छत्यलका — पूर्य्यां
मुत्तरदिशि धनदस्य नगर्य्याम्
हिमालये गङ्गाञ्चित — तीरे
मानसरोवर — पूजित — कुञ्जे।
बक्रे सति पथि गच्छति तत्र
कवेः प्रिया नगरी किल यत्र
उज्जयिनी जयिनी ह्यभिरामा
स्वर्गखण्डमिह विलसति वामा।
सौधोत्संगी भ्रुवो विलासः
राजति शिप्रावातोल्लासः
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदासः ॥५॥

कालो यत्र शरीरधारकः
महाकालरूपेण पालकः
यस्य गले रुद्राक्षमालकः
राजति सततं वृषभचालकः।
पत्या सार्धं यत्र भवानी
विचरति स्वच्छन्दं धृतपाणी
गले विशालं सर्पं दृष्ट्वा
परं निद्रितं तस्य च मत्वा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मन्दं पृच्छति कर्णे तस्य
कथयतु कथं हि भूमौ वासः
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदासः ॥६॥

शम्भुः मन्दं मन्दं गच्छन्
ब्रूते हस्तं धृत्वा स्वच्छम्
तपः फलं कथयामि त्वदीयं
शृणु प्रिये ! ननु वचो मदीयम् ।
त्वया भक्षितं पत्रं पुष्पं
ग्रीष्मतौ पञ्चाग्निस्तप्तः
शरदतौ जलमध्ये गत्वा
जीर्णच्छदस्तदानीं त्यक्तः ।
अतोह्यपर्णे तवैव भक्त्या
तुष्टो मे उज्जयिनीवासः
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदासः ॥७॥

अजिनपलाशधरो जटिलोऽहं
विप्रवटुस्तव भूमौ गत्वा
मनोभावनां ज्ञातुमपृच्छं
तपश्चरसि बाल्ये किं मत्वा ।
अन्विष्यति रत्नं न हि लोके
अन्विष्यते सदैव हि रत्नम्
इच्छति कथं दिगम्बरशूलीं
ध्याने तिष्ठसि सदा सयत्नम् ।
भावं ते ज्ञात्वा गमनोत्के
स्वं रूपं धृतवान् तव दासः
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदासः ॥८॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

सूर्यवंश — कुलभूता भूपा
गुणैः कर्मभिर्भुवि विख्याता
वैवस्वत — मनुवंश — प्रसूतः
धर्मयुतो ननु भूप दिलीपः।
गोचारणफलभूतः पुत्रः
रघुनामा रघुवंशविधाता
यस्मिन् वंशे रामो जातः
धर्मरक्षको राक्षस — हन्ता।
अग्निवर्णभूपेण हि यत्र
विदितो लोके वंशविनाशः
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदासः ॥९॥

शकुन्तला या कन्वपालिता
जननीपितृभ्यां परित्यक्ता
वने वर्धिता चन्द्रकलेव
क्रीडति सखिभिर्वने सहैव।
मृगयाशीलनृपेण हि दृष्टा
लतावल्लरी सिञ्चन्ती सा
तेन चिन्ततं कथं नृलोके
इयं मनोज्ञा जाता विपिने।
दिव्ये लोके रश्मिविलासः
नहि प्रभाया भूतलवासः
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदासः ॥१०॥

वनप्रवेशे वाहूस्फुरणं
पत्नीलाभायैव हि विदितम्
आश्रमभूमौ फलं कुतस्तत्
भवितव्यं सन्देहविहीनम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

सख्या तस्या वृत्तं ज्ञात्वा
Digitized by Arya Samaj Foundation Chennai and eGangotri
विश्वामित्र जनकं मत्वा
जनिं मेनकां स्वर्गविरण्टीं
कण्वपालितामिमां दुहित्रीम्।
आश्वस्तं भव मनो मदीय
दुष्यन्तो ननु तदा जहास
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदासः ॥११॥

दुष्यन्तं दृष्ट्वा ननु वाला
मदनवाण — विद्धा मधुमाला
पर्णकुटीरे शिलाशया सा
कमलनालपत्रै — रनुलिप्ता।
सख्या पृष्टे तापकारणे
यथा कथञ्चिद्व्रीडां व्यक्त्वा
कथयति राजा कुत्र गतोऽसौ
अथवा तिलोदकं मे सिञ्चय।
तया तदानीं रचितो लेखः
मदनप्रभावयुतः सायासः
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदासः ॥१२॥

गर्भभारनमिता शकुन्तला
पतिवियोगदुःखेऽथ तिष्ठति
यज्ञमण्डपे तिष्ठन्ती सा
आगन्तारं मुनिं न पश्यति।
पत्या सार्धं मनसा विचरति
देहेनास्ति केवलं यत्र
दुर्वासा तिष्ठन्तीं दृष्ट्वा
शापं ददौ तदानीं तत्र।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनः स्थितः पुरुषो न ज्ञास्यति
यामि यतोऽहं त्वया सहासः
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदास ॥१३॥

प्रार्थितेन मुनिना प्रकाशितं
मुनेर्वचो नहि भवत्यसत्यम्
ज्ञास्यति परं यदा स द्रक्ष्यति
वृत्तबोधकं शुभं प्रतीकम्।
अभिज्ञानरहिता शकुन्तला
त्यक्ता दुष्यन्तेन कम्पिता
दृष्ट्वाऽङ्गुलीयकं ननु तेन
मनोव्यथा तत्कालं प्राप्ता।
अहर्निशं वैधेयक्रियाभिः
कृतः सदात्मानं प्रति हासः
ब्रूते भारतभूमौ सत्य
विश्वकविः किल कालीदासः ॥१४॥

इन्द्राहूते गच्छति राजा
देवासुरयुद्धे विजयाय
जित्वा शत्रुन् प्रशंसितोऽसौ
आयातो नगरं गमनाय।
मार्गे हेमकूटनग — प्रान्ते
पश्यति वीरबालकं भव्यं
प्रियां मनोज्ञां धृतैकवेणीं
दृश्यं वनप्रान्तस्य च दिव्यम्।
क्षमां ययाचे तदा स राजा
पत्न्या सार्धं सदा उवास
ब्रूते भारतभूमौ सत्यं
विश्वकविः किल कालीदासः[1] ॥१५॥[2]

१—कालीदासपदे दीर्घत्वं वृत्ताय दत्तम्।
२—संस्कृतसम्मेलनपत्रिकाया २२ वर्षस्य प्रथमाङ्के प्रकाशिता आकाशवाणीतः प्रसारिता च / अत्र षोडशमात्रावृत्तम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ब्रूते गद्यकविः श्रीवाणः

[कवितेयं अखिलभारतीयसंस्कृतसम्मेलन, सिवान (बिहार) इत्याख्यस्य स्मारिकायां प्रकाशिता]

विहारे विभवस्य प्रदेशे
परमर्षिच्यवनाञ्चित — देशे
शोणतटे सौभाग्यसंयुते
प्रीतिकूटनगरे मनोहरे।
चित्रभानुनामा ननु विप्रः
वैदिकधर्मधरो विख्यातः
लब्ध्वा वागीशं स्वं पुत्रं
कथयति सम्प्राप्तो मम प्राणः ॥१॥
ब्रूते गद्यकविः श्रीवाणः।

पिता यस्य बाल्यावस्थायां
संस्कारं विहितं हि चकार
ज्ञानं दत्वा परं प्रसन्नः
स्वर्गे लोके सुखं बभार।
लोक — शास्त्रसंवलित — चक्षुषा
तत्त्वदर्शनं यः समवाप
कृत्वा देशाटनमति रूचिभि
र्येन सदा प्राप्तः सम्मानः ॥२॥
ब्रूते गद्यकविः श्रीवाणः।

तीर्थजलैरात्मानं सिञ्चन्
स्वस्तिवाचनं प्रातः कुर्वन्
कृत्वा प्रस्थानं निजदेशात्
प्रीतिकूटतो विदित—प्रदेशात्।
वाणो गच्छति राजनगर्यां
भव्यां ननु हर्षाञ्चित—पुर्य्याम्
यं दृष्ट्वा राजा किल ब्रूते
महान् भुजङ्गः किमसौ तरूणः ॥३॥
ब्रूते गद्यकविः श्रीवाणः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

छान्दसवंशे सञ्जाते सति
लब्धं वेदविहित — विज्ञानम्
गच्छति पितरि दिवं यदि बाल्ये
कृतं जगद्भ्रमणं परिपूर्णम् ।
देशे प्रथितसंस्कृतेमूर्लं
ज्ञानं साहित्यस्यावाप्तम्
एतादृशः पूरुषो भुवने
किं भुजगो वा सत्यं शीनः[1] ॥४॥ (१ मूर्खः, अजगरः)

ब्रूते गद्यकविः श्रीवाणः ।

भुज् कौटिल्ये गतौ धातुना
कुटिलं व्रजति हि सदा भुजंगः
लोके कुटिलनीति — निष्णातः
श्रोष्यति सत्यं कथं प्रचण्डः ।
परनेत्राभ्यां दृश्यं पश्यति
परकर्णाभ्यां शृणोति वाक्यम्
इन्द्रस्त्वं वरुणस्त्वं श्रुत्वा
चाटुगिरा जायते प्रसन्नः ॥५॥

ब्रूते गद्यकविः श्रीवाणः ।

शब्दवाणमाकृष्य निषङ्गात्
वाणो लक्ष्ये यदा चकार
राज्ञो हृदि गत्वा यस्तूर्णं
तमस्तत्र व्याप्तं हि जहार ।
ततः स राजा ब्रूते तं प्रति
भ्रान्तिर्नष्टमेति किल संगात्
भ्रान्तिरद्य मम गता समस्ता
गतः साम्प्रतं निन्द्यः स्वप्नः ॥६॥

ब्रूते गद्यकविः श्रीवाणः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

राजकविर्हर्षस्य सभायाः
सञ्जातः सर्वत्र विजेता
हर्षचरित—नाम्नी किल येन
यस्योपरि रचना ननु रचिता।
वंशवर्णनं तत्र विद्यते
कवेस्तथा राज्ञः सम्पूर्णम्
राज्ञोराज्यं परिमितमन्यत्
सम्पूर्णे भुविभाति हि वाण ॥७॥

ब्रूते गद्यकविः श्रीवाणः।

गार्हस्थ्ये तिष्ठन् कविधन्यः
श्वशुरो यस्य मयूरो मान्यः
तत्पुत्री कविपत्नी याता
ज्ञानवती लोके विख्याता।
बन्धुबान्धवैरनुरुद्धो यः
हर्षचरिद्वर्णनं चकार
हर्षशासिते राज्ये निवसन्
प्राप्तो येन राज—सम्मानः ॥८॥

ब्रूते गद्यकविः श्रीवाणः।

एकस्यां रात्रौ कविपत्नी
कवेः समक्षं माने तिष्ठति
प्रणयकोपयुक्तां तां दृष्ट्वा
कविः सरसरचनां प्रस्तौति।
मानं मुञ्च सम्प्रत्यागच्छ
दशां पश्य हृदयं मम पृच्छ
चिन्ताचक्रगतो हि ददर्श
रथे तिष्ठति सम्प्रति ब्रध्नः ॥९॥ (सूर्यः)

ब्रूते गद्यकविः श्रीवाणः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाणो ब्रूते शृणु तन्वङ्गि !
रजनी गता न मानं मुञ्चसि
चन्द्रश्शीर्णः प्रभाविहीनः
दीपश्चापि घूर्णने लीनः
कृताः प्रणामाः शतसंख्यायां
तव चरणयोरद्य मम भालः
परं क्रोधललिताननवाले
कथयतु कथं राजते मानः ॥१०॥

ब्रूते गद्यकविः श्रीवाणः ।

कविर्मयूरः प्रातः पश्यति
जामाता रचनायां तिष्ठति
श्रुत्वा पादत्रयं पद्यस्य
पादतुरीयं शीघ्रं रचयति ।
चण्डि ! कठिनमस्ति ते हृदयं
किं कोमलमपि कुचसंयोगात्
श्रुत्वा वाणः सुखं दधार
परं तु सा ब्रूते भव रुग्नः ॥११॥

ब्रूते गद्यकविः श्रीवाणः ।

कादम्बरी कथा या विदिता
शूद्रकस्य जन्मत्रयलग्ना
चन्द्रापीड — नायको यत्र
भव्यां कादम्बर्यां मग्नः ।
वैशम्पायनो मित्रं यस्य
प्रणययाचनां कृत्वा सद्यः
महाश्वेतया शप्तो भूत्वा
यः शुकरूपं तदा गृहाण ॥१२॥

ब्रूते गद्यकविः श्रीवाणः ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

महाश्वेतया सार्धं राजा
चन्द्रापीडो भ्रमितुं गच्छति
हेमकूटप्रान्ते निवसन्तीं
दिव्यां कादम्बरीं स पश्यति।
परमप्रसन्नो मदन चेतसा
स्वगतभाषणं स्वंप्रति कुरुते
मम हृदये तां प्रत्यनुरागः
किं तस्या मां प्रत्यपि मानः ॥१३॥

ब्रूते गद्यकविः श्रीवाणः।

पित्रादेशं प्राप्य स राजा
जयिनीमुज्जयिनीमायातः
अनागते मित्रे सति सद्यः
प्रस्थानं विहितं हि चकार।
अच्छोदाञ्चित — भव्यमन्दिरे
महाश्वेतया वृत्तमवाप
वैशम्पायन मित्रं ते ननु
कीरो जातः प्रणये दीनः ॥१४॥

ब्रूते गद्यकविः श्रीवाणः।

मित्रवियोगे चन्द्रापीडो
दुःखार्तः प्राणान् तत्याज
वृत्तं ज्ञात्वा विरहपीडिता
काम्बर्य्यायाता तत्र।
प्राणान् त्यक्तुं समुत्सुकी सा
गगनाभाषं ननु शुश्राव
त्वया प्राप्स्यते राजा नूनं
सम्प्रति जातो न श्रीहीनः ॥१५॥

ब्रूते गद्यकविः श्रीवाणः।

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिरनिद्रातः समुत्थितोऽसौ
राजा कादम्बरीं ददर्श
तयोर्मेलनं तदा बभूव
तथा च प्राप्तः स पुण्डरीकः।
तपस्विनी दृष्ट्वा स्वं पुरूषं
तपः फलं सम्पूर्णमवाप
सुखदमेलनं यत्र वर्णितं
लक्ष्यो जातः सततं पूर्णः ॥१३॥

ब्रूते गद्यकविः श्रीबाणः।

यश्चन्द्रापीडो राजासीत्
पूर्वे जन्मनि नूनं चन्द्रः
जन्मान्तरे शूद्रको भूत्वा
जगति राजते सम्प्रति भद्रः।
कादम्बरी वधूटी भूयः
प्राप्तवती स्वं चन्द्रापीडम्
आह्लादेन युता सञ्जाता
यथा समुद्रे मुदितो मीनः ॥१७॥

ब्रूते गद्यकविः श्रीबाणः।

पुण्डरीकस्तु पूर्वजन्मनि
ज्ञानचक्षुषा भुवं ददर्श
सोऽन्यजन्मनि वैशम्पायनः
शुकनासस्य सुपुत्रो जातः।
महाश्वेतया सार्धं चान्ते
तस्य मेलनं यद्यपि जातम्
प्रणयपदं यः सदा रटन्तः
शप्तस्तया गतो नर भिन्नः ॥१८॥

ब्रूते गद्यकविः श्रीबाणः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

हस्ते धृत्वा शुकं मनोज्ञं
शूद्रकराजसभायां प्राप्ता
या मातंगकन्यका रम्या
गठितावयवा नव्या धन्या।
पुण्डरीक माता लक्ष्मीः सा
पूर्वे जन्मनि लोक विश्रुता
यस्याश्चित्रं लोक — रञ्जकं
सदापश्यति योऽस्ति प्रवीणः ॥१९॥

ब्रूते गद्यकविः श्रीबाणः।

जयतु विहार प्रदेशः

अद्यतनः सर्वथा मनोज्ञो, यो भुवि गौरवभूतः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः।

गृहे गृहे वेदस्य प्रचारः, स्वाहाकारैः शब्दैः
गायत्री — सावित्री — मन्त्रैरर्थयुतैः स्वरयुक्तैः
मालाजटाशिखारेखा — रथ,दण्डध्वजैः घनपूर्णैः
विकृतिप्रधानैर्मन्त्राभ्यासैः, व्यवहारैः प्रकृतिस्थैः
कर्मकाण्डविधिना प्रकाशितः, कर्मण्येव प्रवेशः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥१॥

दशरथपुत्रो राघवरामो, गुरूणासार्धं यत्र
मिथिलायामायातो नूनं, यज्ञं द्रष्टुं तत्र
गुरूवचसा तद्धनु—र्भंजं, स्वीचकार किल सीताम्
लक्ष्मणोऽपि जग्राह तदानीं, प्रियपत्नीं परिणीताम्
जनकसुताया जन्मधारको, धन्यो मिथिला देशः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥२॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत्रासीद्राजा विख्यातो जनको मिथिलाधीशः
सीता यस्यात्मजा सुपूज्या, रामप्रिया विशिष्टा
विष्णोरवतारः श्रीरामो, मिथिलायामायातः
भङ्क्त्वा धनुः शिवस्य तदानीं, सीतयाथ परिणीतः
सीताराम: प्रथितो लोके, यया तदा देवेशः
वैभवशाली यस्यातीतो' जयतु विहारप्रदेशः ॥३॥

वंगराज्यतः पश्चिमदिशि यस्याङ्ग, प्रदेशः ख्यातः
रोमपादराजा त्रेतायां, शृंगर्षिः प्रख्यातः
दशरथभवने गत्वा शृंगः, पुत्रेष्टि स चकार
यस्य प्रभावाद्राजा चतुरः पुत्रानतो दधार।
रामराज्यमद्यापि राजते, नूनं कथावशिषः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥४॥

तपस्विनश्च्यवनस्य निवासः, पर्णकुटीरे यत्र
आगच्छन्ति जना धर्मज्ञा, भिन्नदेशतस्तत्र
विष्णुपदाङ्कित – गयानगर्य्यां पिण्डदानकरनार्थं
रामोयत्र सीतयासार्धं, संजगाम भ्रमणार्थम्।
सीता पिण्डं ददौ तदानीं, पित्रा प्राप्तः शेषः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥५॥

जरासन्धराजा वलशाली, पराक्रमी रणजेता
राजगृहे भव्ये प्रासादे, तिष्ठतिस्म नरणेता
वासुदेवकृष्णेन सहैवं, युद्धं यदा चकार
यस्यभयाद्भीतः श्रीकृष्णो, रूपं नवं दधार
अन्ते त्यक्तो वीरभगवता, भव्यो मथुरादेशः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥६॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अंगप्रदेशे द्वापरकाले, महाबली कर्णः
सूर्यपुत्रविख्यातो भुवने, पराक्रमी रविवर्णः
यस्य भयाद्भीतो देवेन्द्रो, ब्राह्मणवेशे गत्वा
सूर्यप्रदत्तं कवचकुण्डलं, दानस्वरूपं नीत्वा
यदा जहर्षानन्दप्रपनः, कर्णस्तदा जहास
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥७॥

मिथ्या हिंसा यदावर्धिता, कर्मकाण्डव्याजेन
खगहिंसा नरपशुहिंसा वा, रसनातृप्त्यै येन
खगवृन्दैः सन्त्रास — संयुतैर्भीतैर्दिशि प्रयातं
गेहस्थेऽपि च पशुवर्गे, किल कारुण्यं सञ्जातम्
हिंसाशून्यैर्बौद्धभिक्षुकैस्तदा रक्षितो देशः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥८॥

सर्वं शून्यं सर्वं क्षणिकं, दृष्ट्वा गौतमदेवः
वर्षं यावत् तपश्चरित्वा, बोधगयायामेव
अश्वत्थस्य तरोर्मूलस्थो, लब्ध्वा ज्ञानं तत्वं
बुद्धत्वं ननु हिंसाहीनं, ददौ तदा ह्युपदेशम्
अद्यापि प्रथितो भुवि यस्य, ज्ञानबहुलसंदेशः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥९॥

हिंसाया नूनं नाशायाहिंसाधर्मजयाय
जैनधर्मं ख्यातं भुवि यस्य, लोकमनसि जयाय
तीर्थङ्करेषु ख्यातो यत्र, महावीरविज्ञानी
श्वेताम्बरधारी ननु तत्र स्वतो दिगम्बरधारी
पारसनाथ — पर्वते लिखितो, यस्याद्याप्युपदेशः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥१०॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

जैन—बौद्ध—सङ्घ—सदेशेऽयं नीतिधर्मविख्यातः
नास्तिकधर्मयुतेऽपि भारते, यश्च गौरवैः ख्यातः
लंकाचीन—तिब्बत—वर्मासु, जापाने कम्बोजे
धर्मपताका यस्य दृश्यते, नेपालादि—विदेशे
धर्मगुरुर्यस्यास्ति बलेन, सोऽयं भारतदेशः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥११॥

नन्दभयाद्भीतान् नरलोकान् भयमुक्ताञ्च चकार
कूटनीतिविज्ञः कौटिल्यो, विश्वविदितनीतिज्ञः
मौर्यवंशकुलभूतं भूपं, चन्द्रगुप्तधर्मज्ञं
मगधे ह्यभिषेकं स चकार विनाशयन् नृपनन्दम्
अर्थशास्त्रमद्यापि राजते, बुद्धेर्यस्यादेशः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ।.१२॥

कादम्बरी कथा या विदिता' रसपूर्णाऽथ मनोज्ञा
हर्षचरितनाम्नी किल रचना, ह्याख्यायिका द्वितीया
बाणभट्टकविना विनिर्मिता शोणतटस्थे ग्रामे
श्वशुरः कविर्मयूरो यस्य, निवसतिस्म तद्ग्रामे
अद्यापि प्रख्यातो भुवने, प्रीतिकूटसंदेशः
वैभवशाली यस्यातीतो' जयतु विहारप्रदेशः ॥१ ॥

गयामण्डले भव्यपर्वते, सिद्धिदायको देवः
सिद्धनाथनाम्ना विख्यतो, बाणावरे सदैव
बाणासुर — नाम्ना दैत्येनानीतो हिमप्रदेशात्
अत्रैवस्थापितः पूजितः, प्राप्तो बलो महेशात्
अद्यापि च सर्वस्वं दातुं, तुष्टो सदा महेशः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥१४॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दशसहस्रसंख्यायां छात्रास्तत्राध्ययने संलग्नाः
रूद्रशतं यत्रासन् विज्ञा, ज्ञानं दातुं लग्नाः
भिन्नदेशतः समागत्य ते, प्राप्नुवन्ति तज्ज्ञानं
दैविकदैहिकविषये नूनं, प्राप्नुवन्ति विज्ञानम्
नालन्दायामद्य दृश्यते, यस्यालयावशेषः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥१५॥

विक्रमशिला — विश्वविद्याकेन्द्रं देशे विख्यातं
भागलपुर—निकटे प्रख्यातं, यस्याद्याप्यवशेषम्
पुरा सहस्राधिकसंख्यायामध्ययने किल यत्र
विद्यार्थिनो विविधविषयाणां, संलग्नास्ते तत्र
यस्य भूतले विख्यातो ननु, सत्यधर्मसन्देशः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥१६॥

आनयन्ति गंगाजलमेवं पदगामिनश्च यत्र
अद्याप्यभिषेकं कुर्वन्ति, श्रुतिमन्त्रैस्तं तत्र
हिमालयादानीतो नूनं, दशकन्धरेण देवः
पुत्रं विद्यां धनं प्रयच्छति, यो भक्ताय सदैव
ज्योतिर्लिङ्गेष्वेकः ख्यातो, वैद्यनाथदेवेशः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥१७॥

पाटलिपुत्रे चास्ति विशाला, राजधानी खलु यस्य
इतिहासेऽति प्रसिद्धं प्रथितं, विद्याकेन्द्रं तस्य
पुरा पतंजलिरथ च पाणिनिर्व्याडिस्ते शब्दज्ञाः
विश्वविश्रुतायाता ये इह, परीक्षिताः शास्त्रज्ञाः
अस्य महत्त्वं भारतभूमौ, गगने यथा दिनेशः
वैभवशाली यस्यातीतो, जयतु विहारप्रदेशः ॥१८॥[1]

१—पटनासिटीतः प्रकाशितायां बिहारसंस्कृतसम्मेलनपत्रिकायां २४ वर्षस्य चतुर्थांके प्रकाशितेयं कविता।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भ्रातुर्हस्ते न्यस्तम्

रक्षाबन्धनमद्य शोभते, दिनं सुरम्यं भव्यम्
सूत्रं मनःप्रसूतं यस्य, प्रेमबन्धनं दिव्यम्।
भ्रातूरक्षा सदा विधेया, देशे जागरणाय
स्वतन्त्रता—रक्षार्थं नित्यं, लोकमनांसि जयाय॥
भ्रातावीरो देशरक्षको, धर्मपालको धन्यः
भ्रात्रा समं क्व देशे पूज्य, कोऽस्ति भूतले भाव्यः।
मनसा वाचा कर्मप्रेरिता, ब्रूते भागिनी सत्यम्
अद्य भगिन्या रक्षासूत्रं, भ्रातुर्हस्ते न्यस्तम्॥१॥

सत्यप्रतिज्ञां भ्राता कुरुते, रक्षाहेतोस्तस्याः
मनोभावना शुभा मनोज्ञा, यं प्रति नूनं यस्याः।
यस्या हस्ते रक्षासूत्रं, पात्रसंस्थितं नव्यम्
मधुरान्नं मिष्टान्नं दिव्यं, रक्तचन्दनं भव्यम्॥
आयुष्कामं यस्याहृदये, शतं जीवतु भ्राता
ज्ञानदीपप्रभयाञ्चितहृदयो, भवतु भूतले त्राता।
येन राजते मही सुरम्या, रम्या रमास्ति नित्यम्
अद्य भगिन्या रक्षासूत्रं, भ्रातुर्हस्ते न्यस्तम्॥२॥

लक्ष्मीरूपा भूमौ भगिनी, सौभाग्येन युता स्यात्
ज्ञानकर्ममार्गेऽपि भारती, सदा प्रशस्या भूयात्।
सरस्वती ज्ञानाम्बुधारिणी, लोकहिताय प्रशस्या
रणचण्डी चामुण्डा दुर्गा, शत्रुजयाय हि यस्याः॥
रूपं नूनं कर्मसंज्ञकं, एकस्यामपि भिन्नम्
बहुस्याम बहुरूपधारिणी, क्वास्ति भारते खिन्ना।
धन्या भगिनी पूज्या रम्या, जीवनमस्या व्यस्तम्
अद्य भगिन्या रक्षा सूत्रं, भ्रातुर्हस्ते न्यस्तम्॥३॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नरनारीरूपेयं सृष्टिः पुरुषप्रकृत्या युक्ता
सर्वे कर्मरता ननु लोके, सदा सन्ति भयमुक्ताः।
अद्य नरत्वं जन्मसमत्वं, साफल्यं स्वजनत्वम्
कर्मसमत्वं वैविध्यादपि, भाति भूतले भव्यम्॥
कर्मबन्धनं धर्मबन्धनं, प्रेमबन्धनं नव्यम्
ज्ञानवर्धकं ध्यानवर्धकं, शौर्यवर्धकं दिव्यम्।
देशप्रहरिणे शस्त्रधारिणे, रक्षासूत्रं दत्तम्
अद्य भगिन्या भ्रातुर्हस्ते, रक्षासूत्रं न्यस्तम्॥४॥

विश्वमानवो धर्मसंयुतो, मानवधर्म — विजेता
एकस्मिन् सूत्रे ननु बद्धो, भाति सदा जननेता।
ज्ञानवर्धने संसक्तेभ्यो, ज्ञानबन्धनं दत्तम्
राष्ट्रशासने संलग्नेभ्यो, न्यायबन्धनं दत्तम्।
आबालेभ्यो विश्वजनेभ्यः, प्रेमबन्धनं दत्तम्
गृहसंस्थेभ्यः कर्मरतेभ्यः, कर्मबन्धनं दत्तम्
रक्षा — क्षेत्रे संलग्नेभ्यो, रक्षासूत्रं दत्तम्
अद्य भगिन्या रक्षासूत्रं, भ्रातुर्हस्ते न्यस्तम्॥५॥[1]

१—कवितेयं विहारसंस्कृतसम्मेलनपत्रिकायां २४ वर्षस्य तृतीयाङ्के प्रकाशिता।

वसन्तकामिनी शुभा नवा समागता

कोकिला रसालपादपेषु संस्थिताः
कोकिलैः समं सदा निनादसंयुता
क्व हन्ति साम्प्रतं विहाय मां पृच्छति
तारस्वरनिनादिनी न कुत्र गच्छति
जीवनेषु प्रेरणा नवा नवागता
वसन्तकामिनी शुभा नवा समागता॥१॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गन्धमातनोति दिशु चतुर्मंजरी
फुल्लिता प्रकम्पिता लताऽथ वल्लरी
पुष्पगुच्छ — यौवनं विराजते शुभम्
कामुकीव दृश्यते तनोति सा मुदं
रसालसालसंगता कुतः समागता
वसन्तकामिनी शुभा नवा समागता ॥२॥

शोततागतागता वसन्तरश्मयः
दृश्यते सदैव दिनकरस्य विस्मयः
उषा वधूरिवाद्य भूषिता विराजते
अरूणवस्त्रसंवृता तथा प्रकाशते
नवाम्बरेण भूषिताऽऽनता च सा लता
वसन्तकामिनी शुभा नवा समागता ॥३॥

रञ्जिताधरा प्रफुल्लिताधरा शुभा
नेत्रकज्जलेन कामुकायिता नता
शूक्ष्मवस्त्रसंवृता विवस्त्रकाऽथवा
तर्किता वने जनैर्मनोहरागता
लताऽथ पुष्पिता नवाम्बरेण भूषिता
वसन्तकामिनी शुभा नवा समागता ॥४॥

कपोलप्रान्तरञ्जिता गुलालरेणुभि
श्चन्दनानिलेन मोदते सुवासिनी
कामनाभरा प्रकम्पिता च मानिनी
मानसंयुता मदंभरा विलासिनी
नवीनपल्लवैर्ननु चिरंटी सज्जिता
वसन्तकामिनी शुभा नवा समागता ॥५॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नानाधर्मपूजितो देशो, भारतनाम्ना ख्यातः
भरणपोषणे लग्नो यस्य, भरतनृपो विख्यातः।
जडभरतो वा दौष्यन्तिर्वा, रामानुजो विशिष्टः
प्रजापालने सर्वे दक्षाः, सर्वे पूर्णाः शिष्टाः।
येषां जयघोषो ननु लोकैरद्यापि क्रियते
भारतस्य मन्त्रोऽयं ख्यातः, सत्यमेव जयते ॥१॥

सर्वे भारतवर्ष – संस्थिता, - भारतीय पदयुक्ताः
भिन्ने धर्मे तिष्ठन्तोऽपि, भावभूतले बद्धाः।
भारतस्य धर्मोऽयंविदितः, सत्याहिंसायुक्तः
सर्वेसत्यरताः किल येन, सर्वे कर्मणि सक्ताः।
धर्मगुरूर्देशोयं भुवने, नूत — मद्यमनुते
भारतस्य मन्त्रोऽयं ख्यातः, सत्यमेव जयते ॥२॥

रामराज्यमद्यापि भूतले, सदा प्रयच्छति शिक्षाम्
राजा लोकरंजको भूयात्, कथं न दास्यति दीक्षाम्।
यत्र प्रजा भद्रा निरामयाः, सुखिनः कर्मरताःस्युः
कल्याणाय योजना सर्वा, लोकहिताय भवेयुः।
हिंसाधर्मरतो दशवदनः, स्वैः पापैर्म्रियते
भारतस्य मन्त्रोऽयं ख्यातः, सत्यमेव जयते ॥३॥

श्रीकृष्णो हतवान् निजबाल्ये, मथुरायां नृपकंसम्
महाराक्षसीं दुष्टपूतनां, शिशुपालं बलवन्तम्।
शरणे वीरमर्जुनं दृष्ट्वा, स्वीचकार रथवहनम्
मोहमूर्च्छितं तं खलु मत्वा, धर्मसंगरे त्वरितम्।
अर्जुनाय गीतासन्देश,स्तेन तत्र तनुते
भारतस्य मन्त्रोऽयं ख्यातः, सत्यमेव जयते ॥४॥

—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीपावली

आगता दीपावली, ज्योतिः प्रभाया भाविता
दूरभूता किल तमिस्रा,ऽज्ञानजन्या ताडिता।
मृत्तिकादीपे सुरम्यं, सूत्रमेकं प्राप्यते
एकतायाः स्नेहमस्मिन् भावनायां दीप्यते॥
तुङ्गशृङ्गहिमालये, यस्यैव सूत्रं राजते।
दक्षिणस्यां हिन्दसिन्धौ, तत्तु नितरांभ्राजते॥
बंगसागरतः सूतं, तत् पश्चमाब्धौ गच्छति
एकतावृत्तं समस्तं, स्नेहसूत्रे तिष्ठति॥
स्नेहनिकरं देशमध्ये, यावदेव स्थास्यति
तावदेवाध्यात्म — दीप्तिर्भारतेऽपि भविष्यति॥
आगता दीपावली.....

आगता दीपावली, यातं तमो ह्यवलोक्यते
दिव्यज्योतिर्भारतस्य, निकरभूता दृश्यते।
भारतीयो ग्राममध्ये, दीपहस्तो दृश्यते
भित्तिका यस्याद्यलिप्ता, सुधाद्रव्यैः राजते
प्रेमसूत्रे सूत्रितो, नवचित्रवस्त्रैः संयुतः
शर्करादुग्धान्नभक्षी, मोदकेन समन्वितः।
नगरमध्ये विद्युदाभा, दीप्यते ध्वनिसंयुता
नृत्यगानरता स्वयं, लक्ष्मीर्नगर्य्यामागता॥
मधुरगानैः संयुता, नृत्याङ्गना नृत्यैरताः
नयनवाणैर्वेधयन्ती, दृश्यते रात्रौ मुदा॥
आगता दीपावली.....

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वायुःसदा गन्धयुतश्च मन्दः
सुखावहः सर्वप्रियोऽथ रम्यः।
आरोग्यमायुष्यममन्द — बुद्धि
वर्षं नवं मङ्गलमातनोतु ॥१॥

सूर्यः सदा सौख्ययुतैर्मयूखैः
मार्गे गृहे सर्वदिशि प्रयातु।
ददातु शान्तिमय प्रेरयन् धियः
वर्षं नवं मङ्गलमातनोतु ॥२॥

आगत्य कालेन भुवौ हि मेघः
सिञ्चन् प्रयच्छन्नय सौख्यमेव
वृक्षान् लताः शस्यमथौषधिञ्च
वर्षं नवं मङ्गलमातनोतु ॥३॥

लोकाः सदा राष्ट्रहिताय चिन्तकाः
विद्वेषहीनाः सकला भवन्तु।
कुर्वन्तु कार्याणि हि राष्ट्रभावैः
वर्षं नवं मङ्गलमातनोतु ॥४॥

प्रशासकाः न्यायवलेन शाश्वतं
ज्ञानान्विताःकर्मरता भवन्तु।
विनम्रभावैरपि देशसेवकाः
वर्षं नवं मङ्गलमातनोतु ॥५॥

ज्ञानाय शिक्षा यशसे वलञ्च
सर्वं धनं लोकहिताय भूयात्।
मतिं गतिं धर्मरतिं हि प्रेरयत्
वर्षं नवं मङ्गलमातनोतु ॥६॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वेदा धर्मभृताः षडङ्गसहिता ज्ञानाय सम्पादिता
लोकाख्यानपरं प्रभावसहितं काव्येषु यद्गुम्फितम् ।
स्वर्लोकादिप्रकल्पनं सुविहितं मोक्षाय शास्त्रेषु यत्
तत्सर्वं मुनिना कृतं नु तपसा ह्यस्यां क्षितौ भारते ॥१॥

ऋऽग्वेदे बहुधा प्रकाशितमहो विज्ञानतत्त्वं भृशम्
आध्वर्येऽध्वरकर्मणः सुविशदं धर्मार्थमोक्षाश्रितम् ।
साम्नोत्थं सकलं परायणमिदं गान्धर्वविद्याप्रभं
वेदेऽथर्वणके च तन्त्रमखिलं ह्यस्यां क्षितौ भारते ॥२॥

त्रेतायामसुरा महाबलयुताः हिंसापरा नाशका
दुर्दान्ता दशकन्धरप्रभृतयो यज्ञस्य विध्वंसकाः ।
रक्षायां निरतेन विश्वविदितेनार्येण चोत्पाटिताः
रामेण त्रिदशेन बुद्धिविभवेनास्यां क्षितौ भारते ॥३॥

त्रस्तानामभय—प्रदान—निरता श्रीरामसीताकथा
तापान्मुक्तिप्रदायिका सुविमला दिव्या सुभव्योज्ज्वला ।
योगे कर्मप्रधानशासनरता ज्ञानाम्बुराशिस्थिता
श्रीवाल्मीकिमहर्षिणा विरचिता ह्यस्यां क्षितौ भारते ॥४॥

अत्याचाररतं कुबुद्धिविभवं देवस्य विद्वेषकं
कंसं मातुलकं महाबलयुतं हत्वा स देवाग्रजः ।
दुष्टानां दलनाय तत्रभगवान् श्रीकृष्णदेवो महान्
क्रूरं तं शिशुपालकं स हतवानस्यां क्षितौ भारते ॥५॥

न्यायाराधनतत्पराः सुचतुराः सत्यं महाभारते
राज्यार्थं व्यदधुः सुशस्त्रनिपुणा युद्धं पुरा पाण्डवाः ।
सव्येष्ठस्य पदे स्वयं मधुरिपुस्तत्र प्रतिष्ठां गतः
श्रीव्यासेन सुवर्णितञ्च सकलं ह्यस्यां क्षितौ भारते ॥६॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानान्मुक्तिप्रदायकं सुविहितं वेदान्तमत्युज्ज्वलं
भक्तिज्ञानप्रदं दशाष्टकमिदं पुण्यं पुराणं तथा।
शस्त्रास्त्रं विविधं प्रकल्पतमहो दिव्यं धनुः सायकं
आण्वाद्यायुधकं विनाशनिरतं ह्यस्यां क्षितौ भारते ॥७॥

स्वार्थान्धानति हिंसकानसरलान् दृष्ट्वा तु तीर्थङ्करः
सिद्धान्तः प्रतिपादितोऽतिसरलः हिंसाविरोधान्वितः।
त्यागाय प्रथितो दिगम्बरमुनिः श्वेताम्बरो वा महान्
कल्याणाय नृणां सदैव निरतो ह्यस्यां क्षितौ भारते ॥८॥

दुःखेनार्तजनं जरामुपगतं दृष्ट्वा महान् गौतमो
भोगेभ्यः समुपस्थितं बहुविधं भोगादिकं त्यक्तवान्।
तप्त्वा कष्टकरं तपः सुविदितं ज्ञानं ततः प्राप्तवान्
तत्त्वज्ञानप्रचारको जनहिते ह्यस्यां क्षितौ भारते ॥९॥

कौटिल्येन प्रकाशितं सुविशदं ज्ञानान्वितं त्वर्थकं
शास्त्रं यच्च सुराजनीतिसहितं सत्यं प्रकर्षोज्ज्वलम्।
मन्त्रित्वेन प्रदर्शितं सुखकरं कार्यं तथा मन्त्रणं
तत्सर्वं विहितं स्वराष्ट्रविषये ह्यस्यां क्षितौ भारते ॥१०॥

भासेन ग्रथिता जनाभिरमणा काव्येषु दृश्यात्मका
नाट्येषु प्रथितास्त्रयोदशमिता ग्रन्थाः सुरम्याः सदा।
धर्मार्थादिप्रयोजनैश्च सहिताश्चेतोहराः शान्तिदाः
विश्वेषामतिमङ्गलाय विहिता ह्यस्यां क्षितौ भारते ॥११॥

विद्वत्सु प्रतिभान्वितोऽथमतिमान् श्रीकालिदासो महान्
लोकेभ्यो नितरां कवित्वप्रभया काव्यानि नाट्यानि च।
रामस्याभिजनस्य पुण्यमलिखत् काव्यं शिवस्याद्भुतं
गीतिं नाट्यमहो त्रयं रसयुतं ह्यस्यां क्षितौ भारते ॥१२॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अंग्रेजस्य कुशासनेन बहुधा संपीडितानां तथा
त्रस्तानामपि भूतले निवसतां शुद्धात्मनां मोदताम् ।
रक्षार्थं कृतवान् स्वयं जनपिता गांधीतिनामा महान्
आह्वानं जनशासनाय परितो ह्यस्यां क्षितौ भारते ॥१३॥

उद्योगा विलसन्ति नूतनखनिर्नित्यं दरीदृश्यते
पुष्पाणि प्रथितानि शुभ्रसुषमां यच्छन्ति लोकाय च ।
जम्बाम्रादिफलान्विताः सुतरवः शोभां दधत्युत्तमां
प्राप्यन्ते मधुरान्यहोऽथ सुजलान्यस्यां क्षितौ भारते ॥१४॥ [1]

१—शार्दूलविक्रीडितवृत्ते गुम्फितेयं कविताऽऽयामपत्रिकायां प्रकाशिता ।

कुत्रास्ति भद्रो जनः

(शार्दूलविक्रीडितम्)

सम्राजो बहवः स्वछत्रसहिताः प्रोच्चासने संस्थिताः
ये चान्ये नृपजा भ्रमन्ति सदने दुर्योधनाख्यास्तथा ।
तेषां छद्मबलैर्जिता शकुनिना नो पाण्डवा वञ्चिताः
भीष्मं पृच्छति निर्भया द्रुपदजा कुत्रास्ति भद्रो जनः ॥१॥

द्यूते छद्मबलैर्जिता शकुनिना पञ्चैव ते पाण्डवा-
स्तेषां वित्तमहो जितञ्च सकलं राज्य शरीरं तथा ।
किं पत्नी किल हारिता नृपतिना भीष्मोऽपि मौनस्थितः
भीष्मं पृच्छति निर्भया द्रुपदजा कुत्रास्ति भद्रो जनः ॥२॥

राजा तिष्ठति राज्यशासनरतः पुत्रास्तु दुःशासिताः
नारीणां वसनं हरन्ति सततं शीलं पितुः सन्निभम् ।
अन्धोऽस्मीति पिता ब्रवीति मुदितः श्रुत्वाऽपि तासां वचः
भीष्मं पृच्छति निर्भया द्रुपदजा कुत्रास्ति भद्रो जनः ॥३॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दौत्यं कर्तुं महीं गतस्य विदुषः कृष्णस्य भीमं कुतः
शब्दैस्तैः कटुभिर्यदा बहुविधैः संताडितो माधवः।
धीरा बुद्धिविचक्षणा नृपकुले नो संस्थिताः किं तदा
भीष्मं पृच्छति साम्प्रतं द्रुपदजा कुत्रास्ति भद्रो जनः ॥४॥

राज्ये यत्र महाबला नृपतयः कर्णः कृपः संजयो
वंशस्यास्य पितामहोऽपि विदितो भीष्मः प्रतिज्ञान्वितः।
ग्रामान् नैव ददामि राज्यमतुलं ब्रूते तदा कौरवः
भीष्मं पृच्छति निर्भया द्रुपदजा कुत्रास्ति भद्रो जनः ॥५॥

हेतोः कस्य नवं विशालमतुलं लाक्षागृहं निर्मितं
नो जानन्ति महाबलाः प्रमुदिता द्रोणादयो ब्राह्मणाः।
किं ते कर्णकृपादयो नृपतयो ज्ञानेन हीनास्तदा
भीष्मं पृच्छति निर्भया द्रुपदजा कुत्रास्ति भद्रो जनः ॥६॥

दुर्वासा किलप्रेषितो मम गृहे क्रोधप्रधानो मुनि-
र्नूनं कौरवबुद्धिभिर्नियमितः शिष्यैरसंख्यैः सह।
किं क्रोधाग्निरयं विनाशनिरतो नोद्दीपितः कौरवैः
भीष्मं पृच्छति साम्प्रतं द्रुपदजा कुत्रास्ति भद्रो जनः ॥७॥

चक्रव्यूहगते पितुर्विरहिते बालेऽभिमन्यौ सुते
निःशस्त्रे गदया प्रहारमभितश्चक्रुश्च ते कौरवाः।
नो सेनापतिभिर्जयद्रथनृपेनाक्रान्तितो बालको
भीष्मं पृच्छति साम्प्रतं द्रुपदजा कुत्रास्ति भद्रो जनः ॥८॥[1]

१—भारतोदय (हरिद्वार) पत्रिकाया ७५ वर्षस्य द्वितीयाङ्के प्रकाशिता।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कुत्रास्ति भद्रो जनः

गत्वा पश्यति राजकीयसदने लासैर्युतं मन्त्रिणं
द्रव्यार्थं समुपस्थितं मधुरतं वाराङ्गनाभिर्युतम् ।
अस्माभिः किल प्रेषितं बहुमतैर्हा हा हताशो गतः
भाग्यं पृच्छति साम्प्रतं बुधजनः कुत्रास्ति भद्रोजनः ॥१॥

न्यायार्थं समुपागतैर्निजधनैर्न्यायालये मानवै
र्भृत्यो वाञ्छति वाक्किलश्च लिपिको न्यायाधिकारी पुनः ।
द्रव्यंद्रव्यमहो सदैव विहितं न्यायार्थमस्मिन् युगे
भाग्यं पृच्छति साम्प्रतं बुधजनः कुत्रास्ति भद्रोजनः ॥२॥

रुग्नो गच्छति वैद्यराजभवने किं वा चिकित्सालये
भृत्यस्तस्य धनञ्जहार मुदितस्तत्रस्थितस्तद्दिने ।
तत्रस्थैश्च चिकित्सकैरपहृतं शेषं धनं सर्वथा
भाग्यं पृच्छति साम्प्रतं बुधजनः कुत्रास्ति भद्रो जनः ॥३॥

व्याख्यातुं विषयान् व्रजन्ति बहुधा शिक्षालये शिक्षका
स्ताम्बुलं वदने निधाय च करे धूमोन्मुखीं वर्तिकाम् ।
अस्पष्टं प्रवदन्ति तत्र यदिचेद् विज्ञाश्च विद्यार्थिनो
भाग्यं पृच्छति साम्प्रतं बुधजनः कुत्रास्ति भद्रो जनः ॥४॥

उत्कोचग्रहणे धनापहरणे दक्षोऽस्ति यश्शासकः
सेवायां निरताश्च यस्य नितरां सम्बन्धिनः सेवकाः ।
पुत्रास्तस्य हरन्ति शीलमभितः कार्यालये सर्वदा
भाग्यं पृच्छति साम्प्रतं बुधजनः कुत्रास्ति भद्रो जनः ॥५॥

क्षीरे नीरमहो ददाति सततं गोपो गृहे स्वात्मनस्
तैलं खाद्यमथौषधञ्च सकलं सम्मिश्रितं प्राप्यते ।
सर्वे स्वार्थरता वदन्ति भवने शुद्धानि वस्तुनि मे
भाग्यं पृच्छति साम्प्रतं बुधजनः कुत्रास्ति भद्रो जनः ॥६॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शात्रायां निरतस्य वित्तमखिलं कार्यालये मोचितं
वस्त्रं यत् किल पेटिकासु निहित भृत्येन निःसारितम् ।
खाद्यं पोटलिकासु संस्थितमहो याने च लोकैर्हृतं
भाग्यं पृच्छति साम्प्रतं बुधजनः कुत्रास्ति भद्रो जनः ॥७॥

राजा वानरसन्निभो यदि भवेन्मत्तः सुरास्वादकः
केन्द्राद वृश्चिकदंशनं भवति चेद् किंवा भवेन्मानसे ।
कार्यं ञ्चात्र करोति जातिविहितं स्वार्थान्वितः शासकः
भाग्यं पृच्छति साम्प्रतं बुधजनः कुत्रास्ति भद्रो जनः ॥८॥

नो मन्त्री नहि कार्यपालकजनो नो मन्त्रिपुत्रः क्वचित्
नो वैद्यो नहि नीतिरक्षकजनो भद्रो न वै सांसदः ।
नो गोपो न वणिक् न सेवकजनो नाध्यापकः शासकः
भाग्यं पृच्छति साम्प्रतं बुधजनः कुत्रास्ति भद्रो जनः ॥९॥

पुत्राश्च मे क्व स्थिताः

(शार्दूलविक्रीडितम्)

येषां ज्ञानबलैरुदात्तचरितैः सम्मानिताऽहं भृशं
सत्यं ब्रह्म सृतं समस्तभुवनं मिथ्येति येषां मतम् ।
ज्ञानं प्राप्य परोपकारनिरता ये भारते संस्थिता
भाग्यं पृच्छति भारती सकरुणा पुत्राश्च मे क्व स्थिताः ॥१॥

सत्यं सम्प्रति तत् समस्तभुवनं लोकैश्च यद्दृश्यते
तत्रस्थं सकलं सुखाय रचितं भोगाय यद्देहिनाम् ।
मिथ्या ब्रह्म यतो हि योगिभिरहो नालोक्यते का कथा
भाग्यं पृच्छति भारती सकरुणा पुत्राश्च मे क्व स्थिताः ॥२॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाणी सर्वगुणान्वितार्थभरिता देवैरियं भाषिता
संस्कारेण युता समग्रभुवने या मानिता पूजिता।
तस्याश्चात्र जनैरहो स्वसदने केशाः समुत्पाटिताः
भाग्यं पृच्छति भारती सकरुणा पुत्राश्च मे क्व स्थिताः ॥३॥

ये मातुः सदनस्य भारतभुवः रक्षां न कुर्वन्ति ते
ये वाणीं सुरभारतीं स्वजननीं रक्षन्ति नैवाऽत्र ते
पुत्राः सन्ति ममाप्यहो परमहं तैरेव दुःखान्विता
भाग्यं पृच्छति भारती सकरुणा पुत्राश्च मे क्व स्थिताः। ४॥

या भाषा किल निर्गता च भुवने ताः पाठिताः सर्वथा
ताः सर्वाः मम कन्यकाः प्रमुदितास्तिष्ठन्तु सौख्यान्विताः।
मातृत्वस्य पदं न मे निजगृहे ताभिः वयं ताडिता
भाग्यं पृच्छति भारती सकरुणा पुत्राश्च मे क्व स्थिताः ॥५॥

स्वार्थहेतोः सदा चिन्तनं सौख्यदम्[1]

आर्थिकेऽस्मिन् युगे सर्वमर्थे वलं
ज्ञानलाभाय चिन्ताश्रमः केवलम्।
अर्थसम्प्राप्तये यैर्नरैश्चिन्तित
स्वार्थमूर्जस्वि तैरेव सम्पादितम् ॥१॥

स्वार्थहेतोः सदा देवलोकेऽपि त-
श्चिन्तितं देवदेवैरसंख्यैः पुरा।
मर्त्यलोकेऽधुना मानवैस्तद्यदा
भूरि सम्पाद्यते किं तदा निन्दितम् ॥२॥

---

१. व्यंग्यकवितेयं स्रग्विनी छन्दसि रचिता लक्ष्मणपुरतः सर्वगन्धायां प्रकाशिता।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञान—विज्ञानशून्योऽपि मूर्खोऽपि खलु
द्रव्यसाध्यं पदं प्राप्य भो ! मोदते ।
भूतले चात्र देवोपमो दृश्यते
स्वाधिकारं पदं चिन्तयन् केवलम् ॥३॥

ज्ञानमर्थेन नित्यं यदा शोभते
लोकतः सिध्यति ज्ञानमर्थात्मकम् ।
स्वार्थवेत्ता सदाप्नोति भद्रं भृशं
दिव्यमेतीह तेनैव भूमौ सुखम् ॥४॥

आस्पदस्योपयोगोऽस्ति कस्मै हितं
व्यर्थमर्थाप्तये यस्य सम्भावनम् ।
राष्ट्रचिन्ताऽपि भो ! स्वार्थ-सम्प्राप्तये
स्वार्थहेतोः सदा चिन्तनं सौख्यदम् ॥५॥

वेंकटेशाष्टकम्

(इन्द्रवज्रा)

येनाखिलं सृष्टिविधानकार्यं
जीवाः समस्ता ननु प्राणवन्तः ।
कार्येषु लग्नाः प्रभवन्ति नित्यं
तं वेंकटेशं सततं नमामि ॥१॥

सूर्योदयो यस्य बलेन प्रातः
सायं दिनेशस्य तथा प्रयाणम्
कल्पादिकालश्च निमेषयौगै—
स्तं वेंकटेशं सततं नमामि ॥२॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्याज्ञया वर्षति मेघवृन्दो
मेघेन चान्नं परिवर्धते तत् ।
अन्नेन भूतानि भवन्ति लोके
तं वेंकटेशं सततं नमामि ॥३॥

यः सर्वगामी सकलार्थं — सिद्धौ
सर्वस्य पार्श्वे वसति प्रहृष्टः ।
कर्मानुसारेण फलं ददाति
तं वेंकटेश सततं नमामि ॥४॥

आपत्सु मग्नस्य सदैव बन्धु-
श्चिन्तार्तचित्तस्य सखा नृलोके ।
यः सर्वलोकस्य पिता वरिष्ठ-
स्तं वेंकटेशं सततं नमामि ॥५॥

यं साधकाः स्वात्मनि विश्वरूपं
ज्ञानेन योगेन च भूरिभक्त्या ।
पश्यन्ति नित्यं तिरूपर्वतस्थ
तं वेंकटेशं सततं नमामि ॥६॥

ज्ञानेन यस्यात्र विभाति सत्यं
योगेन सर्वोच्चपदं चकास्ति ।
भक्त्या सदाप्नोति सुखं मनुष्य-
स्तं वेंकटेशं सततं नमामि ॥७॥

मोक्षार्थिनो मोक्षमवाप्नुवन्ति
श्रेयस्करं येन सुखं मनुष्याः ।
पुत्रार्थिनः पुत्रधनं मनोज्ञं
तं वेंकटेशं सततं नमामि ॥८॥

वेंकटेशाष्टकं नव्यं 'रामाशीषविनिर्मितम्
सौख्याय मंगलार्थाय, पठनीयं शुभावहम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानानन्दाष्टकम्

(शिखरिणी)

यदाज्ञाने सिन्धौ पतति बहुमायाकुलजले
महामोहाच्छन्ने तरणिरहिते तप्तहृदयः।
भयार्तो भूतेभ्यो भवननिहितेभ्यो ननु तदा
परं ज्ञानानन्दं भजतु मनसा भूरि सततम् ॥१॥

नरत्वं संप्राप्यापि च सुखदविद्या न पठिता
गृहीताविद्या वा सकलसुखनाशाय परितः।
विमूढं तं ब्रूमः परमसदने गच्छतु तथा
परं ज्ञानानन्दं भजतु मनसा भूरि सततम् ॥२॥

धनेनासन्तुष्टिं विविधरसभोगेन च पुनः
सुवर्णालङ्कारैर्मलयरसगन्धेन नितराम्।
तृषार्तो गृह्णाति प्रतिदिनमहो किन्न सदने
परं ज्ञानानन्द भजतु मनसा भूरि सततम् ॥३॥

न यज्ञे संलग्नं सुरगणपदे नापि निरतं
न योगस्याभ्यासे विविध वसुसिद्धौ च हृदयम्।
प्रतीक्षायां कालो निवसति पुरश्चात्र भुवने
परं ज्ञानानन्दं भजतु मनसा भूरि सततम् ॥४॥

अनज्ञातं ज्ञेयं नहि विदितमित्थं यदि तपः
तदा किं कर्त्तव्यं मनसि ननु चिन्ता प्रचलति।
महापारावारे स्वजननिवहे भग्नहृदयः
परं ज्ञानानन्दं भजतु मनसा भूरि सततम् ॥५॥

न सम्माने ज्ञाने न च सविधिगाने न च पुनः
जपे वा संस्तोत्रे नहि प्रणतिपाते च भजने।
मनश्चेत् संलग्नं नहि भवति भूयः प्रमुदितः
परं ज्ञानानन्दं भजतु मनसा भूरि सततम् ॥६॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

महात्मानं देवं भवभयहरं ज्ञान—निकरं
चिदानन्दं भव्यं परमरमण दिव्यपुरूषम् ।
अतीतं तिष्ठन्तं त्रिभुवनवरिष्ठं निजगुरूं
परं ज्ञानानन्दं भजतु मनसा भूरि सततम् ॥७॥

अनन्तञ्चाद्वैतं कलिमलहरं सर्वसुलभं
त्रिकालज्ञं विज्ञं सुरपतिसमं दिव्यवदनम् ।
शिवं शान्ताकारं परमपुरूषं भानुसदृशं
परं ज्ञानानन्दं भजतु मनसा भूरि सततम् ॥८॥

ज्ञानानन्दाष्टकं नव्यं, रामाशोष-विनिर्मितम्
सर्वया पाठमात्रेण भुक्तिमुक्तिप्रदायकम् ॥

गुर्वष्टकम्

भारतस्य सोत्तरप्रदेशे
रामचन्द्रपद वन्दित-देशे ।
अल्मोढायाः सतरौलायां
कृष्णानन्ददीपको जातः ॥
यस्य मनोज्ञा माता लक्ष्मीः
पुत्रं दृष्ट्वा भृशं जहर्ष ।
नवजातं रत्नं भुवि पूज्यं
दिव्यप्रभाभिर्युक्तं वन्दे ॥१॥
पूज्यं ज्ञानानन्दं वन्दे ।

यजुर्वेद—वंशे जाते सति
बाल्ये स्वीयं यजुर्गृहीतम् ।
उत्तर—देशे हिम-प्रदेशे
गत्वा दीर्घं तपः प्रतप्तम् ॥
पूर्वजन्मप्रभया निजतपसा
दिव्यं ज्ञानं ततः प्रदिष्टम् ।
यस्य जन्म ननु मार्गदर्शकं
तं स्वानन्दस्वरूपं वन्दे ॥२॥
पूज्यं ज्ञानानन्दं वन्दे ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

दीक्षा संन्यासस्य गृहीता
चतुर्दशे वर्षे किल बाल्ये ।
शिक्षा योगस्यापि प्रभूता
गुरोर्गृहीताध्यात्म — प्रभाते ॥
पातञ्जलयोगाञ्चित — मखिलं
ज्ञानं व्यवहारस्य प्रपूर्णम् ।
कल्याणस्य कृते हि गृहीतं
येन प्रभूतानन्दं वन्दे ॥३॥

पूज्यं ज्ञानानन्दं वन्दे ।

यो भुवि मञ्चे योगताण्डवं
ज्ञानताण्डवं भृशं चकार ।
यं लोकाः स्तुतिगीतिमङ्गलैः
पूजां कृत्वा सुखं दधार ॥
येन राजते ज्ञानसमग्रं
सिद्धिसमग्रं तथा शोभते ।
यस्मै नमः सदास्ति जनानां
परमहंसदेवं तं वन्दे ॥४॥

पूज्यं ज्ञानानन्दं वन्दे ।

यस्माद्बिभ्यति वेदनिन्दका
दुष्टाश्चौरकर्म — संलग्नाः ।
भक्तिभाववलिताश्च समग्रा
भक्ताः परञ्च सदा प्रसन्नाः ॥
यस्याज्ञया प्रभूतं विश्वं
सदा भासते ज्ञान — प्रभाभिः ।
यस्मिन् पूर्णरता ननु जीवाः
परमं तं गुरुदेवं वन्दे ॥५॥

पूज्यं ज्ञानानन्दं वन्दे ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

बिहारे रोहतास — मण्डले
रायपुरे चौरे मनोहरम् ।
अद्वैताश्रममध्ये दिव्यं
यस्याद्यापि समाधिमन्दिरम् ॥
यत्र स्वरूपं सूक्ष्मं धृत्वा
वसति सदा सर्वत्र मानसे ।
अद्वैतं भूत्वा यो विलसति
तं त्रिकालनिवसन्तं वन्दे ॥६॥

पूज्यं ज्ञानानन्दं वन्दे ।

यस्याश्रमे स्वरूपं धृत्वा
ज्ञानं नित्यं गृहञ्चकार ।
सरस्वती यस्यासोद् वदने
सदा प्रसन्ना सुखं वभार ॥
यस्य ज्ञानगंगायां लोकै-
र्मलमज्ञान—तमः किल धौतम् ।
परिव्रजन्तं भक्तमानसे
तं श्रद्धेयाचार्यं वन्दे ॥७॥

पूज्यं ज्ञानानन्दं वन्दे ।

सत्यं ब्रह्म जगन्मिथ्या ननु
ज्ञानं येन प्रभूतं दत्तम् ।
अज्ञानान्धनाशकं दिव्यं
प्रभापुञ्जितं जगत्समग्रम् ।
मोहभञ्जकं लोक — रक्षकं
शान्ति—कान्तिदं वेदमण्डितम् ।
आदिशंकराचार्य — सम्मतं
तं मनोज्ञमद्वैतं वन्दे ॥८॥

पूज्यं ज्ञानानन्दं वन्दे ।

ज्ञानानन्दगुरोर्गभीरकृपया मन्त्रोपमं शान्तिदं
'रामाशीष' विनिर्मितं सुखकरं गुर्वष्टकं शोभनम् ।
भव्यं भावयुतं प्रभावभरितं धर्मार्थमोक्षप्रदं
गेयं स्तोत्रमथाद्भुतं प्रतिदिनं प्रातः परं मानवैः॥

(गुर्वष्टकमिदं परम सन्देशपत्रिकायाः प्रवेशाङ्के प्रकाशितम् ।)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मनोरथाष्टकम्

(पंचचामरम्)

अजोहरिर्महेश्वरः शुभं तनोतु साम्प्रतं
नवग्रहा दशो दिशो भवन्तु मङ्गलाय ते।
कुलस्य देवता मुदं ददातु पार्वती सदा
वरेण कन्यकासमं विहारिणी भवेच्चिरम् ॥१॥
विनायको वराय शं तनोतु मंगलं शुभम्।

मनुः पराशरादयो वशिष्ठभार्गवादयः
पुलोमजादितिश्च रुक्मिणी शिवाऽथ देवकी।
नलःपुरूरवा शकुन्तला स्वपुत्रसंयुता
भवन्तु शान्तिदायका वराय कन्यका समम् ॥२॥
विनायको वराय शं तनोतु मगलं शुभम्।

सरस्वती शरद्वती दृशद्वतीथ नर्मदा
पुनःपुना त्वसीनदी सुरापगा च गण्डकी।
कलिन्दशैलजा सदैव शीततां सुमङ्गलं
तनोतु कन्यकासमं वराय शोभन दिनम् ॥३॥
विनायको वराय शं तनोतु मंगलं शुभम्।

लताथ संगता यथा महीरुहेण राजते
शिवेन संगता यथा शिवा स्वयं विराजते।
यथा महेन्द्रसंगता शचीपुलोमजा सदा
वरेण कन्यकासमं तथैव राजतां चिरम् ॥४॥
विनायको वराय शं तनोतु मंगलं शुभम्।

अरून्धतिः सुशोभते वशिष्टसंगता यथा
निशाकरेण राजते निशा सुवासिनी यथा।
यथा समुद्रसंगता नदी सुखेन तिष्ठति
तथैव राजतां वरेण कन्यकासमं चिरम् ॥५॥
विनायको वराय शं तनोतु मंगलं शुभम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

ध्रुवस्य या स्थितिः खमण्डले चिरेण दृश्यते
Digitized by Arya Samaj Foundation Chennai and eGangotri
दिवाकरस्य या स्थितिश्चिरन्तनं विलोक्यते ।
सुशः सदैव मोदसंयुता यथा द्युमण्डले
तथैव मोदतां वरेण कन्यकासमं चिरम् ॥६॥

विनायको वराय शं तनोतु मंगलं शुभम् ।

चिरं विलाससंयुतो वरो भवेत्तु भूतले
सुवस्त्रभूषिता तथैव कन्यका चिरं वसेत् ।
वसन्तसूर्यरश्मयो भवन्तु शान्तिदा भृशं
वरेण कन्यकासमं सुहासिनी भवेच्चिरम् ॥७॥

विनायको वराय शं तनोतु मंगलं शुभम् ।

घटो जलेनपूरितः समन्त्रकः शुभप्रदः
रसालपत्रसंयुतो नवान्नशस्यसंभृतः ।
कुशाः सपीततण्डुलाः सशंखब्राह्मणाः सुराः
भवन्तु भाग्यवर्धकाः वराय कन्यका समम् ॥८॥

विनायको वराय शं तनोतु मंगलं शुभम् ।

पाणिनि-प्रज्ञा-अनुसन्धान
तिथी
पु०सं० 1069
भारती पुस्तकालय

मनोरथाष्टकं नव्यं 'रामाशीष'-विनिर्मितम्
विवाहे सौख्यलाभाय पठनीयं शुभावहम् ॥

विवाहकाले हि वराभिषेचने
कन्याभिषेकाय मनोरथाष्टकम् ।
तनोतु ताभ्यां सुखदं सुमङ्गलं
यशोधनं धान्यमहो सुतान्वितम् ।

—::०::—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मङ्गलाष्टकम्

(वंशस्थवृत्तम्)

नवग्रहाश्चन्द्रदिवाकरादयः
सुरा महेन्द्रानलमित्रवायवः ।
भवन्तु सर्वे सुखदाः सदा भृशं
वधूवराभ्यां शुभमस्तु मङ्गलम् ॥१॥

सरस्वती ज्ञानमयेन चक्षुषा
तुषारहारावलिता मनोरमा ।
यशः सुरम्यं प्रतनोतु सौख्यदं
वधूवराभ्यां शुभमस्तु मङ्गलम् ॥२॥

शिवप्रिया पर्वतजाऽथ पार्वती
शिवेन सार्धं शुभमण्डपाङ्गने ।
ददातु सौख्यं शुभदं मनोरमं
वधूवराभ्यां शुभमस्तु मङ्गलम् ॥३॥

हरिप्रिया पद्ममुखेन भामिनी
ब्रवीतु सौख्येन युतं वचः स्वयम् ।
समन्ततः पश्यतु तन्मनोरथं
वधूवराभ्यां शुभमस्तु मङ्गलम् ॥४॥

सरस्वती वेत्रवती पुनःपुना
सुरापगा फल्गुनदी च गण्डकी ।
नदन्तु सौभाग्यवतीति साम्प्रतं
वधूवराभ्यां शुभमस्तु मङ्गलम् ॥५॥

प्रयागकाशी—वदरी—वटेश्वरो
गयाऽथ वृन्दावन—गोकुलादयः ।
पुरी ह्ययोध्या मथुरा ब्रुवन्त्विदं
वधूवराभ्यां शुभमस्तु मङ्गलम् ॥६॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गजाननः शम्भुसुतो विनायकः
करेण माङ्गल्यममेलयत् स्रजम् ।
जगाद गंभीररवेन साम्प्रतं
वधूवराभ्यां शुभमस्तु मङ्गलम् ॥७॥

अजेश—विष्णुस्त्रिदशाश्च पर्वताः
अरुन्धती सप्तमहर्षयः पुनः ।
विवाहकाले प्रवदन्तु शोभनं
वधूवराभ्यां शुभमस्तु मङ्गलम् ॥८॥

'रामाशीष'—विनिर्मितं सुखकरं माङ्गल्यमाविष्कृत
भव्यं भूतियुतं मनोरथप्रदं यन्मङ्गलस्याष्टकम् ।
कन्याभाग्ययुता वरेण सहिता सम्मोदते भूतले
विप्रैस्तत्पठितेविवाहसमये सौभाग्यदं निश्चितम् ॥

आशीर्वचनम्

देव्या युक्तो महेशो निजगणसहितः सौख्यलाभाय नूनं
गौरीपुत्रो गणेशो निजगजवदनैराशु गंभीरघोषैः ।
ब्रह्मा वेदोक्तवान्यानवजलदवपुः शुभ्रशंखस्य नादे
नित्यं सौभाग्यहेतो वितरतु भवतां मंगलं सर्वभोग्यम् ॥

'पहाड़ी बाबा' स्तोत्रम्

(इन्द्रवज्रा)

शैलोन्नतो भूमिमिहैव भित्वा
गर्भात् पृथिव्याश्च समाजगाम ।
शोभां सुभव्यां विहितां नगर्य्याः
द्रष्टुं शिवस्यात्मप्रकाश—हेतोः ॥१॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

यन्मन्दिरं भाति शिवस्य भव्यं
शृङ्गेषु रम्यं धवलं महाभम् ।
तन्निर्मितं स्थातुमिहैव तस्य
भूताधिवासस्य महेश्वरस्य ॥२॥

वृक्षा विचित्रा नवपत्रयुक्तास्
छाया—प्रदानाय विभान्ति तत्र ।
पुष्पाण्यनेकानि किरन्ति गन्धं
रुद्रार्चने तानि तु तत्पराणि ॥३॥

गौर्या सहैवात्र शिवो भ्रमन्तां
द्रष्टुं नगर्य्या न शशाक शोभाम् ।
अत्युन्नते पर्वतशृङ्गभागे
गत्वा सदा पश्यति मङ्गलाय ॥४॥

यत्रागता भूतगणा भ्रमन्तो
दृष्ट्वा नगर्य्याः रमणीयदृश्यम् ।
आह्लादयुक्ता ननु निर्निमेषं
पश्यन्ति तत्रैव प्रदेश—शोभाम् ॥५॥

क्षेत्रेषु भिन्नेषु च पूजितास्ते
सर्वे गणा ग्राम्यजनैः सुभक्त्या ।
अद्यापि ते तादृशभावयुक्तैः
सत्पूजिताः सन्ति सदा सुपूज्याः ॥६॥

शृङ्गेषु सानन्दमनादि—देवं
दृष्ट्वा ततोऽन्ये कुलपूज्यदेवाः ।
आगत्य तत्रैव वसन्ति पार्श्वे
नित्यं शिवस्यार्चन—लोभभावात् ॥७॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

बाबा—पहाड़ीति च पर्वतस्थः
लोकेषु पूज्यः शुभदः सुभव्यः ।
जानन्ति सर्वे समुपासकास्तं
लोकाः समस्ताः खलु देशभक्त : ॥८॥

ज्ञानाय बाला शिवनामसक्ता
वस्त्रैः सुचित्रैः धृतभव्यवेशाः ।
पूजार्चनं शान्तिमयेन सर्वाः
कुर्वन्ति मन्त्रैः खलु तोयपुष्पैः ॥९॥

वस्त्रैरनेकैश्च तथोत्तरीयैः
सद्भूषिताः कज्जलरञ्जिताक्ष्यः ।
कुर्वन्ति कन्या ननु तत्र पूजा
मिच्छन्ति भव्यं पतिमाशुतोषात् ॥१०॥

लास्येन युक्ताः सुखदा नताङ्ग्यो
गत्वा तरूण्यः खलु पूजयन्ति ।
इच्छन्ति पुत्रादिकमाशुतोषात्
गायन्ति गीतं शुभरागयुक्तम् ॥११॥

काष्ठस्य दण्डं निजपुत्रहस्तं
गच्छन्ति धृत्वा शिवशब्दयुक्ताः ।
मोक्षाय वृद्धा ननु मन्दगत्या
कुर्वन्ति पूजां फलपुष्पतोयैः ॥१२॥

बालाश्च शर्वात् ननु बुद्धियुक्ता
दिव्येन पत्या सह कामकन्याः ।
पुत्रादियुक्ताः सुखदास्तरूण्यो
मोक्षादियुक्ताश्च भवन्ति वृद्धा ॥१३॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

शर्वाय भव्याय वृषध्वजाय
Digitized by Arya Samaj Foundation Chennai and eGangotri
मृत्युञ्जयाय प्रमथाधिपाय।
रूद्राय भीमाय भयंकराय
श्रीकण्ठभर्गाय नमो मृडाय ॥१३॥

देवाधिदेवाय महेश्वराय
सर्वज्ञभूताय जटाधराय।
उग्राय गङ्गाधरशङ्कराय
तस्मै गिरीशाय नमः शिवाय ॥१५॥

वाणैक संख्यासु शिवस्य पूजां
श्लोकैः शुभैर्यः कुरूते प्रभाते।
पुण्यैः स रूद्राक्षरपादयुक्तैः
प्राप्नोति बुद्धि सुतमर्थमायुः ॥१६॥

पाण्डेयोपाधियुक्तेन, रामाशीषेण निर्मितम्
शिवभक्त्या प्रसादाच्च स्तोत्रं भक्तिप्रदं शुभम् ॥

शुभं स्वागतम्

(स्रग्विनी)

येन संन्यासदीक्षा स्ववाल्ये धृता
येन तप्तं तपो दीर्घकालात्मकम्।
येन सत्यस्य चित्ते कृतं दर्शनं
येन धर्मस्य तत्त्वं सदा सूचितम् ॥१॥

शम्भुरूपाय तस्मै शुभं स्वागतम्
मङ्गलेशाय तस्मै शुभं स्वागतम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized By Arya Samaj Foundation Chennai and eGangotri

यस्य जन्मास्ति लोकस्य कल्याणदं
यस्य नामास्ति तापत्रयं नाशकम् ।
यस्य वाणी सुरम्या सदा शान्तिदा
येन ज्ञानस्य तत्त्वं सदा दर्शितम् ॥२॥

पूज्यदेवाय तस्मै शुभं स्वागतम्
मङ्गलेशाय तस्मै शुभं स्वागतम् ।

ज्ञानदीपेन सर्वं तमो नाशयन्
धर्मकेतुं पृथिव्यां समारोपयन् ।
ज्ञानगम्भीरवाचा परिप्लावयन्
दर्शयन् राजते ब्रह्मरूपं सृतम् ॥३॥

ज्ञानरूपाय तस्मै शुभं स्वागतम
मङ्गलेशाय तस्मै शुभं स्वागतम् ।

द्वैतभिन्नं मतं यस्य चाद्वैतकं
ब्रह्मसत्यं हि मिथ्या जगत्केवलम् ।
भक्तिमार्गेण नित्यस्य प्राप्तिर्यदा
येन लोकेऽद्य सत्यं समाचारितम् ॥४॥

सर्वपूज्याय तस्मै शुभं स्वागतम्
मङ्गलेशाय तस्म शुभं स्वागतम् ।

ब्रह्मलीनोऽपि यः सर्वदा राजते
सर्वतत्त्वेषु भूतेषु संदृश्यते ।
यस्य वाणी च नित्या भृशं श्रूयते
येन जीवेषु बन्धुत्वमाचारितम् ॥५॥

धर्मरूपाय तस्मै शुभं स्वागतम्
मङ्गलेशाय तस्मै शुभं स्वागतम् ।

(स्वागतगानमिदं 'परमस्वरूप' पत्रिकायां प्रकाशितम्)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

विद्यापतेर्गीतम्

वारिविन्दुरिव तप्तसैकते, सुतसखिरमणी—वर्गः
शीघ्रं याति लयं ननु तस्मिन् सदा दृश्यते नरकः।
त्वां विस्मृत्य तेषुरक्तोऽहं जीवनपरिणतिकाले
आशा याता विश्वासोऽसौ नहि तिष्ठति मम भाले।
त्वं तारणकर्मणि संलग्नो दयादान—निरतोऽसि
याचकाय मह्यं ते दानं कदा भविष्यति ब्रूहि।
जीवनार्धमिह शयने यातं बाल्ये क्रीडालग्नः
जरागते सामर्थ्यविहीनस्तव चरणे नहि मग्नः।
निधुवनरमणिरभसरसयुक्तं तारुण्यं किल यातम्
भजनं तव कृतवान्नहि किञ्चित् कदा भजिष्ये नूनम्।
सागरलहरी यथा सागरे सम्भूतालयमेति
लब्ध्वा जन्म तथा त्वत्तोऽपि लोकस्त्वयिपुनरेति।
चतुर्मुखाः किल गताः प्रभूताः का गणना ह्यपरेषाम्
एकस्त्वञ्चाद्यन्तविहीनः कूटस्थः सर्वेषाम्।
ब्रूते विद्यापतिकविरेषः सम्प्राप्ता यमभीतिः
दूरीकर्तुं प्रभवसि तां त्वं मे शरणं ननु प्रीतिः।
आद्यनादिविबुधानां नाथस्त्वञ्चैको विश्वस्मिन्
तारणभारस्त्वय्येवाहं मे भीतिर्नहि तस्मिन्।
(विद्यापतेर्गीतस्य संस्कृतकवितायां भावबन्धनम्)

तं भारतं नौमि समृद्धदेशम्

(उपजातिः, इन्द्रवज्रा)

यस्योत्तरे भाति हिमालयाद्रिर्नगाधिराजो भुवि देवतात्मा
देशस्य साक्षात्प्रतिहारभूतस्तं भारतं नौमि समृद्धदेशम् ॥१॥

हिन्दार्णवो यस्य तु दक्षिणस्यां व्यापारमार्गं प्रतनोति लोके
त्रयः समुद्रा मिलिताश्च यत्र तं भारतं नौमि समृद्धदेशम् ॥२॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

वङ्गार्णवो यस्य च पूर्वभागे देशाय मेघानधिकान् तनोति
ददाति नीरं नितरां सुखाय तं भारतं नौमि समृद्धदेशम् ॥३॥

महासमुद्रोऽस्ति च पश्चिमायां यस्यारवाब्धिर्बहुदेशयोजी
रक्षाव्रतीवाति विभाति नूनं तं भारतं नौमि समृद्धदेशम् ॥४॥

हिमालयाद् हिन्दमहासमुद्रं वंगार्णवात् सागरमारवेयम्
विभाति यावत् किल यस्य सीमा तं भारतं नौमि समृद्धदेशम्॥५॥

वहन्ति यत्रैव पवित्रनद्यो यस्यात्मभूमिं परिपावयन्ति
याभिः प्रसन्ना पृथिवी विभाति तं भारतं नौमि समृद्धदेशम् ॥६॥

यत्रास्ति गंगायमुनाविपाशा शिप्राऽथ गोदाऽथ सरस्वती च
सुवर्णरेखा भुवि नर्मदा च तं भारतं नौमि समृद्धदेशम् ॥७॥

सुमेरू — सह्याद्रिमहेन्द्रविन्ध्या मैनाकमन्दारहिमाद्रिशैलाः
विभान्ति यत्रैव विशेषभावैस्तं भारतं नौमि समृद्धदेशम् ॥८॥

काशीपुरी बोधगया तु यत्र काञ्चितिरूद्धारवती प्रयागाः
चिदम्बरं शोणपुरं विशालं तं भारतं नौमि समृद्धदेशम् ॥९॥

कन्याकुमारी मथुरा ह्ययोध्या कुरूञ्च वृन्दानमत्र भूमौ
उज्जैन पावा मदुराई नूनं तं भारतं नौमि समृद्धदेशम् ॥१०॥

कन्याष्वहल्या द्रुपदात्मजा च, सुताऽथ कुन्तस्य तथा च तारा
मन्दोदरी पञ्च भुवि प्रसिद्धास्तं भारतं नौमि समृद्धदेशम् ॥११॥

रंभासुराकौस्तुभपारिजाता धन्वन्तरी सोमधनुर्विषञ्च
गजोऽमृतं शंखरमाश्वगावस्तं भारतं नौमि समृद्धदेशम् ॥१२॥

वशिष्टदक्षाऽत्रिपराशराश्च मनुर्मरीचिर्भृगुनारदास्ते
यत्राभवन् काश्यपगौतमाख्यास्तं भारतं नौमि समृद्धदेशम् ॥१३॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

रामत्रयं मत्स्यवराहकूर्मा यत्रावतारा विदिताः पृथिव्याम्
नृसिंहको वामनकृष्णबुद्धास्तं भारतं नौमि समृद्धदेशम् ॥१४॥

ज्ञानाय प्राचीनतमाः प्रशाला यत्रैव वेदाः खलु धर्ममूलाः
विज्ञानयुक्ता भुवि देववाण्यां तं भारतं नौमि समृद्धदेशम् ॥१५॥

यज्ञाय यत्रैव हि ब्राह्मणानि ज्ञानाय तत्त्वस्य च दर्शनानि
परापरार्थाय च ब्रह्मशास्त्रं तं भारतं नौमि समृद्धदेशम् ॥१६॥

बाल्मीकिना यत्र सुगुम्फितं तत् रामायणं काव्यमहो मनोज्ञम्
आदर्शभूतं ननु तथ्ययुक्तं तं भारतं नौमि समृद्धदेशम् ॥१७॥

व्यासेन यत्रैव सुगुम्फितं तत् काव्यं महाभारतनामधेयम्
गीता शुभा तत्र प्रकाशिता च तं भारतं नौमि समृद्धदेशम् ॥१८॥

धर्मार्थभूतानि च तेन यत्र बृहत् पुराणानि दशाष्टकानि
वृत्तानि राज्ञां ननु गुम्फितानि तं भारतं नौमि समृद्धदेशम् ॥१९॥

यत्राभवत् सत्ययुगे ऋतस्य त्रेतायुगे रामनृपस्य राज्यम्
ततश्च कृष्णस्य जगन्नृपस्य तं भारतं नौमि समृद्धदेशम् ॥२०॥

सूर्येन्दुभौमा गुरुशुक्रयुक्ताः शनिश्चरो राहुबुधाश्च केतवः
ग्रहाः प्रतन्वन्ति शुभानि यत्र तं भारतं नौमि समृद्धदेशम् ॥२१॥

मेषालिकन्या वृषसिंहकर्का नक्रो धनुर्युग्मतुलाऽथमीनाः
घट्यश्च ये यत्र लसन्ति भूमौ तं भारतं नौमि समृद्धदेशम् ॥२२॥

स्वयंभुवा सत्क्रियते त्रिरूपैः सृष्टिः स्थितिर्नाशनमत्र भूमौ
वेदान्तसूत्रेषु विभाति रूपं तं भारतं नौमि समृद्धदेशम् ॥२३॥

पञ्चैव तत्त्वानि गुणत्रयेण तन्वन्ति रूपाणि तुरीयकाणि
मूलं हि संसारविभाजनस्य तं भारतं नौमि समृद्धदेशम् ॥२४॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आत्मतत्त्वं सदान्तःपुरे दृश्यताम्

(स्रग्विनी)

भक्तिमार्गान्विते यत्पुरे तिष्ठति
मध्यभागे सरोजासने शाश्वतम् ।
पश्यतीदं नवं भूतलं तच्चिरं
ब्रह्मरूपं प्रकाशात्मकं ज्ञायताम् ॥१॥
आत्मतत्त्वं सदान्तःपुरे दृश्यताम् ।

ज्ञानगंगाजलैर्यैर्मलं क्षालितं
तैः कृतञ्चात्मपट्टं पवित्रं नवम् ।
स्वच्छपट्टे स्वरूप स्वरूपैः सदा
तूलिकाभिर्भृशं लिख्यतां लिख्यताम् ॥२॥
आत्मतत्त्वं सदान्तःपुरे दृश्यताम् ।

कर्मदेवस्य पूजा कृता यैर्नरैः
कर्ममार्गस्य यात्राऽथ सम्पादिता ।
जीवनञ्चात्र नव्यं तथा सार्थकं
तैरिदं शान्तिदं कामदं धार्यताम् ॥३॥
आत्मतत्त्वं सदान्तःपुरे दृश्यताम् ।

येन तीर्थस्य यात्रा कृता जीवने
नापि तप्तं तपो नापि धर्मः कृतः ।
भौतिकेऽस्मिन् समुद्रे सदा मुद्रया
नौकया तन्तुं मिच्छद्भिरागम्यताम् ॥४॥
आत्मतत्त्वं सदान्तःपुरे दृश्यताम् ।

ज्ञानदीपस्य दीप्तिर्यतो दीप्यते
वर्तिका यत्र लग्नाऽस्ति भावान्विता ।
स्नेहभक्त्याञ्चिता चेद् भवेद्वर्तिका
दीप्तरूपं तदा तत्पुरे प्राप्यताम् ॥५॥
आत्म तत्त्वं सदान्तःपुरे दृश्यताम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

आश्रमे पावने यत्र वाचामृतं
धारया वर्षतीवाज्ञया सद्गुरोः।
तापतप्तैस्तथा दुःखमग्नैर्जनै—
र्भौतिकान्धैस्तु तत् सत्वरं पीयताम् ॥६॥

आत्मतत्त्वं सदान्तःपुरे दृश्यताम्।

(कवितेयं परमस्वरूपपत्रिकाया तृतीयवर्षस्य द्वितीयाङ्के प्रकाशिता)

अभिनन्दनपत्रम्

विद्याविद्योतितान्तःकरणानां सुरभारतीसमुपासकानां
विद्वद्वरेण्यानां विद्यावाचस्पति पं० ब्रह्मदत्त-
द्विवेदिमहोदयानामभिनन्दने भावा-
वलितैरर्थपूर्णैःशब्दकुसुमै-
रभ्यर्चनम्

श्रीर्भव्या यस्य भाले विलसति नितरां भासुरा भ्राजमाना
गम्भीरान्तःप्रदेशे विचरणबहुला वैखरी कण्ठमार्गात्।
वाणी संस्कारयुक्ता लसति मधुमयी शास्त्रसिद्धान्तसक्ता
द्वेषं त्यक्त्वा विलासैर्निवसति कमला शारदासंगता सा ॥१॥

ब्रह्मण्येवाथ लग्नः प्रवचननिरतो ब्रह्मविद्याप्रवीणः
मिथ्या भूर्ब्रह्मसत्यं भुविसृतमखिलं यस्य मायाप्रपञ्चे।
अद्वैतं शङ्कराख्यं श्रुतिरसभरितं स्थापयन्विश्वमञ्चे
विज्ञः सर्वार्थदक्षो जयति शुभगुणैर्ब्रह्मदत्तो वरेण्यः ॥२॥

दत्तो येनात्र सर्वः श्रुतिपथनिरतेनाथ वेदान्तबोधः
साहित्यं शब्दशास्त्रं कपिलमुनिकृतं सांख्यशास्त्रञ्च योगम्।
मीमांसा—न्यायशास्त्रं प्रतिपद—पठितं दत्तमेवं समस्तं
विद्याविद्योतितान्तो जयति निजगुणैर्ब्रह्मदत्तो वदान्यः ॥३॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वित्रा वा सन्ति लोके नहि बहुलजना ज्ञानविज्ञानदक्षाः
तेष्वेकः श्री द्विवेदी विलसति सततं ज्ञानपुञ्जप्रयच्छन् ।
शिष्येभ्यो गूढतत्त्वं ननु सहजदिशा सान्द्रगम्भीरघोषैः
सोऽयं विद्वद्वरेण्यो जयति बुधवरो भारतीभव्यगेहे ॥४॥

वेदो वेदाङ्गयुक्तः क्रमपदसहितो धर्मभूतः प्रभूतः
नानाभाष्याभिभूतः प्रमुदितमनसा येन दृष्टो विशिष्टः ।
शिक्षा धर्मादियुक्ता सुललितविधिना भूतले सम्प्रदत्ता
सोऽयं विद्यावदान्यो जयति सुरगिरावर्धको ब्रह्मदत्तः ॥५॥

स्रग्धरापञ्चपुष्पाणि, शिष्यभावान्वितानि च
रामाशीर्षेण दत्तानि, गुरोः पूजनहेतवे ॥

गंगा जयतु

गंगा जयतु जयतु जगदम्बा, जयतु चन्द्रमा धन्यः
जयतु शिवस्य विभूषितभालः हरति तापमिह नित्यः ।

कलकलकलमिति शब्दं नदति, दिशति कलौ तु कलाभिः
अखिलकार्यमतिधैर्ययुतेन, कुरु त्वं चात्र प्रभाभिः ।
सुरसरिता प्रवहति ननु लोके, अविरलगतिभिः पुण्या
जयतु पावका, जयतु कष्टहा, जयतु जलं त्वं धन्या ॥१॥
गंगा जयतु जयतु जगदम्बा……

कात्यायनी धनस्य विधात्री कोमलकरुणामूर्तिः
जगदम्बा निखिलाम्बा त्वं किल गणपतिपुत्रप्रसूतिः ।
शरजन्मा तव पुत्रो विदितः, वीरस्तारक-कालः
वीरप्रसूता मंगलमाता, हर भवतापं भूयः ॥२॥
गंगा जयतु जयतु जगदम्बा……

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लोकाह्लाद्युतः शुभचन्द्रः किरति जगति बहुकान्तिं
रञ्जयति प्रियजनमतिनित्यं, सदाप्रयच्छति शान्तिम् ।
तव प्रभया कुमुदश्रीः प्रथिता, गौतमक्रोधात् खिन्नः
साहित्ये तव विपुलोमहिमा, त्वमसि जनाय वदान्यः ॥३॥
गंगा जयतु जयतु जगदम्बा……

ज्ञानचक्षुषा विदितो भालस्त्रिनयन - नयनाधारः
पश्यति विश्वमिदं मृदुभूतं, सकलशान्ति - संभारः ।
दुष्टानां दलने द्रुतगत्या भवति सदा विकरालः
कामदेववदनस्य विनाशे दीप्तो वह्नेर्ज्वालः ॥४॥
गंगा जयतु जयतु जगदम्बा……

गंगा - जगदम्बा - कुमुदेशाः, शम्भोः भाले लग्नाः
ददति सुखं ज्ञानं पीयूषं, लोक - रक्षणे मग्नाः ।
शक्तिः शुभा सदा भुवि विदिता, जटासु लसिता पुण्या
ययाज्ञानतमः किल नष्टं, तया विना को मान्यः ॥५॥
गंगा जयतु जयतु जगदम्बा……

शकुन्तला रचयति निजलेखम्

पृच्छति सखीमनङ्गपीडिता
शिलापट्टमधिरूढा
नहि पत्रं नहि मसी लेखनी
वार्ता खलु मम गूढा ।
प्रियम्बदा प्रियभाषणदक्षा
ब्रूते सत्वरमेवम्
धैर्यं धारय निश्चलमनसा
चिन्तय भावविशेषम् ॥१॥
शकुन्तला रचयति निजलेखम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नलिनीदलमेकं ननु दत्वा
कथयति पश्यतु पत्रम्
लिखतु नखैश्चित्रयतु विचारा—
नविकलमनसा मात्रम् ।
नलिनीपत्रं हस्ते धृत्वा
अन्तर्मुदिता भावैः
शिला-पट्टके तिर्यक्, भूत्वा
शब्दैः रचयति शेषम् ॥२॥
शकुन्तला रचयति निजलेखम् ।

अखिलं रागं तुभ्यं दत्वा
त्वया विनाऽहं दीना
जलं विना मत्सीव गतिर्मे
दुःखे : नित्यनिमग्ना ।
तव हृदयं नहि जाने सम्प्रति
मम वह्नौ प्रक्षिप्तम्
आशातन्तुरिहास्ति बन्धनं
यास्यत्यथवा शेषम् ॥३॥
शकुन्तला रचयति निजलेखम् ।

अनसूया वामे खलु तस्याः
प्रियम्वदा पृष्ठस्था
पश्यत्येका लेखमुद्रणं
रोमाञ्चं तत्रस्था ।
स्थित्वा पुरो नृपः प्रच्छन्नः
श्रुत्वा तस्याः शब्दम्
पत्रोत्तरशब्दानति गूढान्
कथयति तां निजदेशम् ॥४॥
शकुन्तला रचयति निजलेखम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तन्वङ्गि ! कथयामि कथञ्चित्
मदनप्रभावयुतोऽहम्
मन्ये त्वामतितपति मन्मथः
दहत्येव मामनिशम् ।
कुमुद्वतीं दिवसो नहि ग्लपयति
तथा यथा किल चन्द्रम्
सुधावर्षिणी त्वं तृषितोऽहं
जीवय मामनुवेलम् ॥५॥
शकुन्तला रचयति निजलेखम् ।

(कवितेयं संस्कृत सम्मेलन पत्रिकायाः द्वाविंश वर्षस्य तृतीयाङ्के प्रकाशिता)

स्वागतगीतिः

स्वागतं ते व्याहरामि, स्वागतं शुभस्वागतम्
स्वागतं मम प्राङ्गणे, तव स्वागतं शुभस्वागतम् ।

देवभाषाचिन्तकोऽहं, देवभाषाचिन्तकम्
भारती-समुपासकोऽहं, भारतीसमुपासकम् ।
भारते ननु भारतीभवने, करोमि स्वागतम्
भारतीपुत्रं करोमि, स्वागतं शुभ-स्वागतम् ॥१॥
स्वागतं ते व्याहरामि……

भारती जाता प्रसन्ना येन पुत्रेणाधुना
येन विहिता मातृसेवा, देशसेवा चाधुना ।
त्वामरपुत्रं नमामि, ते करोमि स्वागतम्
स्वागतं हृदयाङ्गने तव, स्वागतं शुभस्वागतम् ॥२॥
स्वागतं ते व्याहरामि……

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ज्ञानपुष्पै - ज्ञानधूपै - ज्ञानमाला - संयुतः
ज्ञानरूपं ज्ञानपुरूषं पूजयामि समन्ततः ।
पूजनीयं भारतीपुत्रं नमामि सादरम्
भारतं देशं नमामि ते करोमि स्वागतम् ॥३॥
स्वागतं ते व्याहरामि.....

उद्बोधनगीतिः

देशेषु पूज्यमस्तीदं भारतं समृद्धम्
देशेषु ख्यातमस्तीदं भारतं प्रवृद्धम् ॥१॥

ख्यातो हिमालयोऽस्ति ख्यातास्ति मातृगंगा
ख्यातास्ति वैजयन्ती देशस्य सा त्रिरंगा ॥२॥

ते सन्ति भारतीया ये भारते वसन्ति
गायन्ति गीतमस्मै, प्राणान् समर्पयन्ति ॥३॥

वेदाः समाद्रियन्ते, बाईबिलं सुपूज्यम्
ग्रन्थो गुरोः सुपूज्यः, पूज्यं सदा कुराणम् ॥४॥

क्षेत्रे शुभे प्रयागे, सम्मेलनं नदीनाम्
देशस्य दक्षिणस्यां, हिन्दादि-सागराणाम् ॥५॥

ख्यातोऽत्र संगमोऽस्ति देशस्य मानवानाम्
इत्थं समस्तदेशे, धर्मस्य धारकाणाम् ॥६॥

जलमेकमस्ति सर्वं, नद्यः परं विभिन्ना
मतमेकमस्ति नूनं, धर्मो नरस्य भिन्नः ॥७॥

वैविध्यमस्ति देशे, परमेकता विचित्रा
देशस्य रक्षणार्थं, कटिबद्धता प्रशस्ता ॥८॥

देशस्य मानवानां, ननु भारतं समानम्
बन्धुत्व-भावनाया, मुक्तं नवं निधानम् ॥९॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

ननु सत्यमेव जयते, यस्यास्ति मूलमन्त्रः
न्यायाधिकारहेतोः, सर्वः सदा स्वतन्त्रः ॥१०॥

रामस्य रामराज्यं, बुद्धस्य सत्यनिष्ठा
श्री गाँधिनः समस्ता, यत्राधृतास्ति सत्ता ॥११॥

सर्वे स्वतन्त्रभावैर्देशस्य भावनायाम्
कुर्वन्तु कार्यमित्थं, नवदेशकल्पनायाम् ॥१२॥

सर्वे वदन्तु नित्यं समभावना - प्रपन्नम्
वाक्यं समत्वपूर्णं, समवेदनादियुक्तम् ॥१३॥

उज्जयिन्यां कालिदासः

(मन्दाक्रान्ता)

धारा यस्याः स्खलति सततं यौवनोद्दामगत्या
प्रान्तस्थानां जलखगरवैर्नूपुरं या विभर्ति ।
स्थाने - स्थाने मिलति पुरूषैर्योषितां स्नानकाले
मन्ये शिप्राऽऽचरति मुदिता नागराणां बधूवत् ॥१॥

उज्जैनी या प्रथितविदिशायां कवेर्भव्यकाव्ये
शिप्राप्रान्ते प्रकृतिसुषमासंभृता दिव्यभूमिः ।
सा सत्यं किं ललितकुसुमोद्यानशोभाभिभूता
छायादानाद् धरति जलदो यत्र स्वेदान् बधूनाम् ॥२॥

शिप्राप्रान्ते प्रथितविदिशायां महाकालभूतो
ज्ञानाधीशः कविकुलगुरोः कालिदासस्य देवः ।
मन्ये ज्ञानं वितरति सदा साम्प्रतं दिव्यभूतो
वर्षे वर्षे कविकुलगुरूर्दृश्यते कालिदासः ॥३॥

शक्तिः कान्या प्रकृतिनिहिता विद्यते धर्मरूपा
यस्यादासः कविकुलगुरूः कलिदासोऽस्ति ख्यातः ।
कालात् पूर्वं किल कवचिनी सर्वयुक्ता विशाला
मन्ये कालो निवसति सदा श्रीविशालानगर्य्याम् ॥४॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

शिप्रा

(शार्दूलविक्रीडितम्)

शिप्रा स्वच्छजलैस्खलत्यविरलं शब्दायते नित्यशः
प्रान्तस्थाः किल पक्षिणः कलरवैर्गायन्ति तस्या यशः ।
प्रासादेषु रतान्तरे श्रमगतां सत्यं सुधासीकरैः
सेवां सातिशयां करोति मुदिता सख्येव तत्र स्थिता ॥

भारतस्य प्रत्यभिज्ञानम्

(स्रग्धरा)

दोधूयन्तां त्रिरङ्गा बलभरनमिता लोकनम्याः सुरम्याः
नृत्यन्तां ते मयूराः विकसितकुसुमं राजतां सत्सरोजम् ।
शार्दूलाः शौर्यरूपाः प्रमुदितपशवो भान्तु देशे सदैव
वाणी संस्कारयुक्ता विलसतु भुवने भारती भावगम्या ॥

(मदिरा)

भारतभूमिरतीवसमुज्ज्वलकान्तियुता शुभशान्तिप्रदा
शीतलमन्दसुगन्धितगन्धवहेन सदा नितरां विमला ।
भाति सुश्यामलशाद्वलकान्तिभिरात्मगभस्तिभिराशु शुभा
कोकिलकण्ठरवप्रभयाञ्चित गुञ्जितकुञ्ज कुटीरघना ॥

शुभ्र हिमाचलचारूरूचा ननु धीरगंभीरसमुद्रजलेन
भासुरभास्करभव्यप्रभातविभाभिरनन्तसुखेन धरित्री ।
स्वच्छतरंगतरंगितवारिभिरच्छछटाभिरसंख्य प्रमोदै
र्भाति विभूषितचन्द्रकलाभिरतुल्यघनैः कुसुमादिभिरन्यैः ॥

ग्रहाणां सम्बद्धता

(शार्दूलविक्रीडितम्)

संरक्ता प्रथमोदयास्तगतिना दृष्ट्वा द्वितीयानना
पृच्छत्यात्मगतं तृतीयवसना क्वासौ चतुर्थः पुनः ।
किं वा पञ्चमप्रेरितः प्रतिदिनं षष्ठाङ्गणे गच्छति
ब्रूते सप्तम पीड़िताष्टम दशामाप्नोत्वहो तां नवाम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

(शिखरिणी)

मृगाक्ष्या देहोऽयं ग्रहगणविभाभिर्विलसति
रविर्भौमो नित्यं निजनिजगुणैश्चाप्यधरयोः ।
नखेष्विन्दुः शुक्रो रदनगणमध्ये कचगणे
शनीराहुः केतुर्गुरुरपि बुधस्तत्र वसने ॥

शृणु कौतुक-सद्मनि यज्जातम्

सुवस्त्राभिः सखीभिः सार्धं
कौतुकभवने मन्दं याता,
अञ्चलेन वदनं पिधाय ननु
मुञ्चन्त्विति कथयन्त्यपि नीता ।
द्वारपक्षमुभयञ्च पिनद्धं,
त्यक्त्वा सर्वा यदा निर्गता ।
निवर्तिताभिः किमपि न कथितं
त्वं वद, मम हृदये किं जातम् ॥१॥
शृणु कौतुकसद्मनि यज्जातम् ।

ताभिस्त्यक्ता भृशं कम्पिता
नवपुरुषेण धृताऽहं भवने,
समाश्वास्य हृदयं प्रकम्पितं
शय्यायामानीता सदने ।
शयनीये नव वस्त्रभूषिते
नेत्ररंजके परमविचित्रे,
गन्धपूरिते पुष्पभूषिते
शयितुं तदा च तेन सूचितम् ॥२॥
शृणु कौतुकसद्मनि यज्जातम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

मदनरागरंगेन रञ्जितं
विविधकामचित्रेण चित्रितम्,
पुष्पसज्जितं गन्ध - पूरितं
भवनं दृष्ट्वा मया विस्मृतम् ।
तत्र तेन सह शय्यामध्ये
वार्ता कृत्वा हृदयमर्पितम्
मनसि तस्य किं तदा वर्तते
किमपि न मे हृदयं संजातम् ॥३॥
शृणु कौतुकसद्मनि यज्जातम् ।

मन्दं मन्दं मधुर - जल्पनं
स्वैरं स्वैरं करस्पर्शनम्,
कथनीयं किञ्चित् सव्याजं:
कर्णे परं तु मधुरचुम्बनम् ।
बुद्धिर्नास्ति तदानीं काचित्
मनसि परं जातं चाह्लादम्,
मम हृदयं जाने नहि तस्मिन्
पूर्णञ्चाद्वैतं सञ्जातम् ॥४॥
शृणु कौतुकसद्मनि यज्जातम् ।

हृदयस्वरूपं त्वं जानासि
ब्रह्मानन्दस्वरूपं किं तत्,
अद्वैतं द्वैतादपि रम्यं
तत्र बन्धनं पूर्णं लीनम् ।
यत्र भिन्नता कापि न दृष्टा
दृष्टमहो तत्त्वैक्यमनन्तम्,
मूकास्वादनवच्च स्वरूप
कथ्यं नास्ति मयाप्यनुभूतम् ॥५॥
शृणु कौतुकसद्मनि यज्जातम् ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

अद्वैताद् द्वैतस्य कल्पनम्
स्रष्टुः संरचनायां दृष्टम्,
जगत्समग्रं तेन पूञ्जितं
संसारस्यार्थत्वं नीतम् ।
सत्यं ब्रह्म जगन्मिथ्या किं
द्वैतादप्यद्वैतमहत्त्वम्
जगद्दर्शनंचास्ति किमन्यत्
पृच्छतु रजनीशं भगवन्तम् ॥६॥
शृणु कौतुकसद्मनि यज्जातम् ।

श्लिष्ट-प्रहासिका

(शार्दूलविक्रीडितम्)

कालज्ञोऽत्र विराजते निजगुणैः सत्यं स्ववाग्वैभवैः
उष्णीषादिभिरन्वितैः स्वगमनैराह्लादयन् प्रेक्षकान् ।
भाषायां स्वरविक्रियां प्रकटयन् हृष्टःशिरः कम्पकः
किं प्राप्तो गणको गृहे नहि सखे मे कुक्कुटो भास्वरः ॥

मित्राद्भयम्

अर्थप्रधानसमये निजकार्यहेतो
मैत्रीं करोति सततं छलछद्मयुक्तः ।
दृष्ट्वा धनं हरति तत् प्रचुरं यतो हि
मित्राद्भयं भवति किं नहि भूतलेऽस्मिन् ॥१॥

वाक्यं ब्रवीति मधुरं पुरतः सुखार्थं
निन्दां करोति परमां ननु पृष्ठतश्च ।
सत्यं नटस्य नवरूपधराद्विचित्रा-
न्मित्राद्भयं भवति किं नहि भूतलेऽस्मिन् ॥२॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

गत्वा स्वमित्रसदने निजचाटुवाग्भिः
सम्मोहयँस्तदभितो बहुधैर्ययुक्तः ।
गृह्णाति तस्य निहित विभवस्य लेखं
मित्राद्भयं भवति किं नहि भूतलेऽस्मिन् ॥३॥

दुःखाभिभूतहृदये सति दुःखपूर्ण-
श्चाह्लादितो भवति मित्रमहो परोक्षे ।
दृष्ट्वा सुखं तपति यो हृदये प्रबुद्धा-
न्मित्राद्भयं भवति किं नहि भूतलेऽस्मिन् ॥४॥

विद्यागृहेऽस्य लिखितोत्तर—पुस्तिकायां
दत्वा क्रमं निजकरेण निजं करोति ।
स्वस्यां क्रमं लिखति तस्य विचित्रभूता-
न्मित्राद्भयं भवति किं नहि भूतलेऽस्मिन् ॥५॥

मित्राद्बिभेति प्रथमं नहि कोऽपि दर्पात
सम्मील्य तेन सह तत्प्रकरोत्यकार्यम् ।
तत्राभियोगसमये खलु साक्षिभूता-
न्मित्राद्भयं भवति किं नहि भूतलेऽस्मिन् ॥६॥

रक्षां चकार मनुजो निजशत्रुवर्गा-
न्मित्रान्न कोऽपि परमद्य दशा विचित्रा
शत्रुर्बिभेति ननु नाशरतं न मित्रं
मित्राद्भयं भवति किं नहि भूतलेऽस्मिन् ॥७॥

स्तेये तथापहरणे किल बालिकाया
वित्तस्य मित्रसदनान्ननु लुण्ठने च ।
अग्रेसरं भवति मित्रमहो विचित्रं
मित्राद्भयं भवति किं नहि भूतलेऽस्मिन् ॥८॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्यरते विशति मित्रमहो स्वकीयं
बाधां ददाति नितरां स्वमनोनुकूलाम् ।
ईर्ष्याग्निना ज्वलति सत्यमतः प्रभिन्ना-
न्मित्राद्भयं भवति किं नहि भूतलेऽस्मिन् ॥९॥

अभ्युन्नतेऽथ समये हि विरोधपत्रं
नाम्ना परस्य प्रददाति प्रभिन्नमित्रम् ।
कार्यं विहन्ति बहुलं किल हासयुक्ता-
न्मित्राद्भयं भवति किं नहि भूतलेऽस्मिन् ॥१०॥

कौटिल्यनीतिनिपुणान्ननु नेतृभूताद्
दुग्धान्विताग्निजमुखाद् विषपूर्णकुम्भात् ।
साहाय्यदान—निरताभिनये सुलग्ना-
न्मित्राद्भयं भवति किं नहि भूतलेऽस्मिन् ॥११॥

(कवितेयं सर्वगन्धा पत्रिकायामपि प्रकाशिता)

खेलति खलु होलीं वनमाली

यमुनातटे कदम्बनिकुञ्जे
गोपगणैः सह क्रीडन् ।
सव्य-करे वंशीं ननु धृत्वा
गोपसुतानिह पश्यन् ॥
कुत्रगता राधा रसनाशी
श्रुता न तस्या गाली ।
गालीं विना न रूचिरा होली
कथयति किल वनमाली ॥

राधा सखिभिः सहिताऽऽयाता
ताभिर्दत्ता ताली ।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

करपत्रे धृत्वाऽथ गुलालं
आयाता तत्राली ॥
राधामुखकमलं मुखकमलै
श्चुम्बतीह वनमाली ।
तेन तया ताभिश्च तदानीं
श्रुताति मधुरा गाली ॥
खेलति ननु होलीं वनमाली ॥

होलिका

(१)

हे माधव शृणु व्रजनगरेऽस्मिन्
होली रंगयुता ।
एक पक्षतो गोप-बालिका
नाना-रंगधृता ॥
आनन्दाञ्चितहृदयाः सर्वा
गाली-दानरताः ।
अपरपक्षतः कृष्णसखायः
रंगगुलालयुताः ॥
पाटलवर्णकपोलरञ्जने
त्वरिता मोदरताः ।
व्रजवनिता निजतीक्ष्ण-कटाक्षैः
हत्वा पलायिताः ॥

(२)

खेलति जगदम्बा ननु होलीं
धृत्वा करे रंगकारीम् ।
रुद्रशिरसि रंगं किल दत्वा
ब्रूते ननु मधुरां वाणीम् ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याप्तं ब्रह्माण्डे भगवन्तं
दृष्ट्वाथ च दत्वा तालीम् ।
लज्जावनतमुखी प्रियगौरी
क्रीडति रूचिरां होलीम् ॥
यथा गुलालैरहं प्रसन्ना
त्वमपि प्रसन्नो भासि ।
तथा जना भूतले प्रसन्नाः
सदा भवन्त्विह शूलिन् ॥

नेता

(वसन्ततिलका)

नेतास्म्यहं कलियुगस्य युगप्रणेता
लोका भयेन मम पृष्ठचरा भवन्ति ।
मञ्चस्थितो बहुलभाषणतत्परो वै
सत्यं भवामि ननु तत्र महाभिनेता ॥१॥

आन्दोलने निखिलकर्मकरान्नयामि
सम्बोधयामि खलु संघबलस्य वीरान् ।
प्राणान् त्यजन्तु न तु शौर्यमहो बलं वा
लोष्ठैः शिरांसि हतकस्य च घातयन्तु ॥२॥

शब्दैर्जयेति नितरां बहुभाषमाणा
लोकास्तदा च मम वाचमनुस्मरन्ति ।
हर्म्याणि राजभवनानि च गोपुराणि
लौष्ठैरनन्तलगुडैः सुविनाशयन्ति ॥३॥

सन्धिं विधाय सहकर्मकरस्य पक्षान्
गृह्णाम्यहं तदनुतोषमशेष पक्षैः ।
पुष्टिं भजामि बहुभक्ष्यसमन्वितांश्च
निद्राविशेषविषयेऽस्मि च कुम्भकर्णः ॥४॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्यागस्य मूर्तिरहमस्मि यतस्त्रिलोके
त्यागं विना भवति कस्य विकासकार्यम् ।
लाभाय कार्यमखिलं मनसा विचिन्वन्
त्यागं दलस्य विदधामि दृढप्रतिज्ञः ॥५॥

सर्वे स्वतन्त्राः

(उपजातिः)

छात्राः स्वतन्त्रा गुरवः स्वतन्त्रा
प्रमाणपत्रे गुरूता न बोधे ।
अनेन शिक्षा ग्रहणेन किं स्यात्
स्तेये कृपायामथवा फलानि ॥१॥

देशे स्वतन्त्रो जननेतृवर्गो
मतं गृहीत्वा रमते सुखेन ।
निर्वाचने यां कुरुते प्रतिज्ञां
ध्रुवं स तद्विस्मरणे स्वतन्त्रः ॥२॥

महास्वतन्त्रा ह्यधिकारिणस्ते
उत्कोचमेवास्ति यदीयलक्ष्यम् ।
विहाय कार्याणि सुरां पिवन्तः
क्लवेषु नित्यं विचरन्ति भद्राः ॥३॥

सर्वस्वतन्त्राः किल मन्त्रिणस्ते
पदं ग्रहीतुं सततं यतन्ते ।
येषां न लज्जा न भयं न चिन्ता
त्यजन्ति लाभाय दलं वचश्च ॥४॥

नमामि चाटुकारिते

करौ पुटं विधाय हे, नमामि चाटुकारिते
सहस्रमन्त्रसंयुतो नमामि चाटुकारिते

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वं पुरातनासि त्वं हि सर्वलोक-गामिनी
आकृतिं विनापि त्वं प्रभूतरूपधारिणी।
विनोदिनी मनोहरा विचित्रभाव-संयुता
सदा मुखे निवासिनी समग्रलोक-भाविता ॥१॥

तवैव चातुरी कृपा विभाति शक्तिसंयुते
करौ पुटं विधाय हे नमामि चाटुकारिते ॥

स्वार्थसिद्धिरस्ति यत्र तत्र त्वं हि गच्छसि
विधाय चातुरीं तथा तदा त्वमेव पृच्छसि।
सुवस्त्रमिदं दृश्यते सदा तवैव सुन्दरं
त्वदीयमूर्ध्वमम्बरं तथाविधं मनोहरम् ॥२॥

रसान्वितं वचःसदा ब्रवीषि मोददायिके
करौपुटं विधाय हे नमामि चाटुकारिते ॥

सदैव स्वार्थसिद्धये, प्रभुं विलोक्य पश्यसि
नटीव लोकमंचके मुखं विलोक्य जल्पसि।
विशेषणं त्वयार्पितं सदैव विस्मयावहं
प्रदूषणं त्वया कृतं सदैव स्वार्थसिद्धिदम् ॥३॥

न दृश्यते त्वया सम मनोहरा महीतले
करौ पुटं विधाय हे नमामि चाटुकारिते ॥

गुरोर्मुखात्त्वयार्जितं समग्रशब्दजालकं
स्वभावतस्तथार्जितं, समग्रमोहमालकम्।
विकीर्यते समन्ततः प्रभूतमोह-तण्डुलं
त्वया च लुब्धकैरिवाद्य जालकं प्रसारितम् ॥४॥

त्वया समं विभाति का भुविप्रभासमन्विते
करो पुटं विधाय हे नमामि चाटुकारिते ॥

गिरा तवैव सर्वदा प्रचाल्यते प्रशासनं
तवैव मोहबन्धनैर्विभात्यहोऽनुशासनम्।
यथेच्छसि तथैव त्वं ददासि मोहमालिकां
यया तवैव चक्षुषा स पश्यति स्वतालिकाम् ॥५॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वमेव सर्वसाधने क्षमासि सर्वसाधिके
करौ पुटं विधाय हे नमामि चाटुकारिते ॥

वचस्त्वदीयमस्ति कोऽस्ति मां विना प्रपूजितः
सदा विभाति भूतले भृशमया सुपूजितः
कृपामवाप्य मे सदा तरन्ति कष्टसागरात्
धनं बलं यशोऽखिलं समाप्नुवन्ति तत्क्षणात् ॥६॥

भृशं विलासिनी शुभं. चले सदा तडिल्लते
करौ पुटं विधाय हे नमामि चाटुकारिते ॥

विवादे प्रहसितवदनः

(स्रग्धरा)

अंगुल्या कः कपाटे प्रहरति कुटिलस्त्र्यम्बको नारिकेलः ?
नो शूली, किञ्चभिक्षुर्नहिभुजगपतिः शेषनागो वरिष्ठः
नाऽहं देवो महेशः किमसि नृवरो नो हरः किन्नु चौरः
इत्थं गौरीविवादे प्रहसितवदनः पातु वो भूतनाथः ॥

अंगुल्या कः कपाटे प्रहरतिकुटिलःश्रीपतिः किं धनेशः
नो विष्णुः किं समीरो नहि धरणिपतिः किं नरो वीरपुत्रः ।
नूनं पीताम्बरोऽहं किमसि नटवरो नो विधुः किन्नु चन्द्रः
इत्थं पद्माविवादे प्रहसितवदनः पातु वः पद्मनाभः ॥

अंगुल्या कः कपाटे प्रहरतिकुटिलोराघवो लक्ष्मणः किं
नो रामो जामदग्न्यः किमसि दशरथस्यात्मजोऽहं विदग्धे ।
किं रामस्यानुजस्त्वं नहिजनकसुतायाः पतिः किन्नु शृंगी
इत्थं सीताविवादे प्रहसितवदनः पातु वः रामभद्रः ॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्मै नमः कलियुगस्य विनायकाय

(वसन्ततिलका)

गौरीसुताय मधुमोदक—भक्षकाय
लम्बोदराय च महेश्वरपुत्रकाय ।
माङ्गल्यकर्मणि सदैव समागताय
तस्मै नमः कलियुगस्य विनायकाय ॥१॥

शिक्षालये विहितपुस्तक - पाठकाय
नानाम्बराय वहुरूपधृत- व्रताय ।
ज्ञानस्य भारवहने मुदितान्तराय
तस्मै नमः कलियुगस्य विनायकाय ॥२॥

नानागृहे नवविधैस्तु निवेशकाय
न्यायालये च नितरां बहुचर्चिताय ।
विघ्नेश्वराय नववाहन—मूषकाय
तस्मै नमः कलियुगस्य विनायकाय ॥३॥

राज्यासने मतमवाप्य सुपूजिताय
कृत्या विधानविहिताय विधायकाय ।
अर्थार्चकाय पदवन्दितमस्तकाय
तस्मै नमः कलियुगस्य विनायकाय ॥४॥

गोतामृतेन सतत रूचिवर्द्धकाय
नूनं विभूषितकलत्रसमावृताय ।
गेहागताय गजकर्णमनोहराय
तस्मै नमः कलियुगस्य विनायकाय ॥५॥

सिन्दूरविन्दु — रचिताखिलमस्तकाय
स्थूलाय मित्रनिवहाय सुराधिपाय ।
वस्त्राञ्चिताय बहुपुष्पमनोहराय
तस्मै नमः कलियुगस्य विनायकाय ॥६॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

भारतीया स्थितिः

भारतं जातं स्वतन्त्रं मुक्तता समुपागता
भारतं मुक्तं पराधीनस्य ते दिवसा गताः।
परमहो देशेऽधुना नहि दृश्यते समभावना
जातिवादः क्षेत्रवादो वर्धते राज्येऽधुना ॥१॥

मानवानां यो विभागो गुणविशेषैराधृतः
सोऽद्य नानाभावनाभिर्दूषितो नृत्ये रतः।
या पताका देशमुक्तौ मानवस्य करे स्थिता
जातिभेदे वर्गभेदे साऽधुना समुपस्थिता ॥२॥

जातितन्त्रं दृश्यते जनतन्त्रयुक्ते भारते
वर्गवादो धर्मवादः क्षेत्रवादो राजते।
विद्यते जात्यादिवादो भिन्नतायाः प्रेरकः
हिन्दुमुस्लिमजैन–सिक्खेसाईरूपो भेदकः ॥३॥

वर्धते ह्यातंकवादो जातिवादो वर्धते
स्वार्थसिद्धौ चिन्तनं ननु राष्ट्रहानिर्जायते।
यादृशी देशे विषमता दृश्यते जृम्भायिता
तादृशी नासीत् कराली भेदने समुपस्थिता ॥४॥

भोजनं नहि प्राप्यते संदृश्यते पार्श्वे व्यथा
वस्त्रमस्ति सुदुर्लभं भवनस्य तेषां का कथा।
पातुं जलं नहि प्राप्यते दृश्यते चिन्तागता
ज्ञानस्य दीपो नागतोऽज्ञानता समुपागता ॥५॥

शेरते ह्येके विविधताराङ्किते भवनेऽधुना
परमहो भवनं विना गणयन्ति चान्ये तारकम्।
भक्षयत्येकस्य दुग्धं कुक्कुरोऽपि स्वेच्छया
परमहो चणकं विना गणयन्ति चान्ये रात्रकम् ॥६॥

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

धारयत्येको नवीनं वस्त्रमित्थं नित्यशः
परमहो वस्त्रं विना संदृश्यते बहुनग्नकम् ।
गम्यते याने विमाने नित्यमेकैर्भारते
परमहो चान्यैर्न दृष्टं जीवने किल यानकम् ॥७॥

लक्षमुद्रा लक्षते ह्येकस्य पार्श्वे नित्यशः
परमहो चान्यस्य हस्ते दृश्यते नह्याणकम् ।
स्वर्णमौक्तिकहीरकाणां भूषणमेको दधाति
परमहो चान्यस्य हस्ते दुर्लभं किल लौहकम् ॥८॥

भारतं जातं स्वतन्त्रं मौक्तिकं समुपागतं
परमहो हंसस्य वदने नागतं किल मौक्तिकम् ।
मालकं विजयार्थिने दातुं धृतं कपिनाऽधुना
परमहो दत्तं न कस्मै त्रोटितं किल मालकम् ॥९॥

प्रहेलिकाः

अर्जुनेन महेन्द्रेण रामेण लक्ष्मणेन कः
हतो भ्रातासुरो भूपः भूपपुत्रो रणे वद ॥१॥
(कर्णः, वृत्रः, रावणः, मेघनादः)

अजपुत्रस्य भव्यस्य वाहनं तस्य भोजनम्
तद्भक्ष्यं तत्सुतो नित्यं तस्याराध्योऽभिरक्षतु ॥२॥
(रामः)

(अजः शिवः, अजपुत्रस्य कार्तिकेयस्य वाहनं मयूरः, तस्य भोजनं सर्पः, तस्य भक्ष्यः वायुः तस्य पुत्रः हनूमान्, तस्याराध्यो रामः ।)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

नहि शस्त्रेण शास्त्रेण - शक्त्या बाहुबलेन च
सदा जयति सर्वेषां मनः कस्तं वदेन्नरः ॥३॥

(बालकः)

मन्त्रणा मन्त्रवद् ग्राह्या कस्य कस्याः कदा नरैः
मन्त्रोऽयं विदितो येन सोऽस्ति लोके विचक्षणः ॥४॥

(शास्त्रस्य, कान्तायाः, सर्वदा)

कस्य देवस्य पुत्रस्य दृश्यते गजमस्तकम्
एकाधिकं मुखं ब्रूहि मंगलाय जयाय च ॥५॥

(शंकरस्य)

बाल्ये केन गतं वनं स्वगुरुणा सार्धं हता राक्षसी
नूनं यज्ञमहोत्सवे प्रमुदिता का सा वृता शोभना ।
वाचा त्यक्तमहो पितुश्च सकलं राज्यं धनं छत्रकं
युद्धे येन हता निशाचरगणाःतस्मै नमः सर्वदा ॥६॥

(रामेण, सीता)

—::०::—

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri



CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

लेखकस्यान्याः कृतयः

१ मयूखदूतम्—खण्डकाव्यम्
२ शिखाबन्धनम्—संस्कृतनाटकम्
३ इन्दिराशतकम्—
४ कर्णार्जुनीयम् संस्कृतनाटकम्
५ वैदिकसूक्तसंग्रहः—(स्नातकोत्तर वर्गस्य कृते
६ प्रहेलिकाशतकम्—
७ कृष्णोदयम्—महाकाव्यम् अप्रकाशितम्
८ उपाधिविवेचनम्— अप्रकाशितम्
९ विकृतिपाठप्रयोगः— अप्रकाशितम्
१० स्नातक- वैदिकसूक्तम्— अप्रकाशितम्
११ संस्कार-परिशीलन— अप्रकाशितम्
१२ निरुक्त का भाषा वैज्ञानिक एवं आलोचनात्मक अध्ययन अप्रकाशितम्
१३ निर्वचनशास्त्र की भारतीय परम्परा एवं यास्क अप्रकाशितम्
१४ अष्टाविंशति शोधलेखाः— प्रकाशिताः

पुस्तक-प्राप्ति-स्थानम्
प्रबोध संस्कृत प्रकाशनम्
द्वारा-डॉ० रामाशीष पाण्डेय
संस्कृत विभाग
मारवाड़ी महाविद्यालय, राँची (बिहार)

CC-0.Panini Kanya Maha Vidyalaya Collection.